Digitized by Arya Samaj Foundation Chennai and eGangotri

MADHU RAWNI
1959 G. K. U.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
111033
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री श्रीजगद्गुरु राघवेन्द्रमठाधीश श्री सुयमीन्द्रतीर्थ

स्वामिपादानां कृपापोषिता

मधुरवाणी

संस्कृत मास पत्रिका

1110.353

शके १८८० विकारि संवत्सर ज्येष्ठाङ्कः १९५९

प्रधान संपादकाः

कविकुलतिलक विद्यावैभव वेदान्तशिरोमणि साहित्यालङ्कार

राजा एस्. गुरुराजाचार्याः

卐

संपादकाः

गलगलीत्युपाव्हाः पण्ढरीनाथाचार्याः

वार्षिक मूल्यं रु. ५-०० एकाङ्कस्य ०-५०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुरवाण्या मुख्य संचालकाः

श्री श्रीमद्राघवेन्द्र मठाधीश श्री सुयमींद्रतीर्थ स्वामिपादाः नंजनगूडु

श्री श्री विबुधेशतीर्थ स्वामिपादाः अधमारुमठ, उडुपी
श्री श्री मद् व्यासराज मठाधीश स्वामिपादाः
श्रीमन्तः पद्मनाभराव वैद्य महोदयाः

प्रतिवर्ष १०१ रू प्रदाः मधुरवाण्याः संरक्षकाः

श्री श्री प्रेजावर मठाधीश स्वामिपादाः
" मंडारगिरि मठाधीश स्वामिपादाः
" श्री भीमनकट्टी मठाधीश स्वामिपादाः
" श्री श्री स्वादीमठाधीश स्वामिपादाः
" कूडली शृंगेरी मठाधीश श्रीशंकराचार्य स्वामिपादाः

विषयानुक्रमणिका

	विषयाः	लेखकाः	पत्रसंख्या
१)	मंगलम्	मधुरवाणी संस्थापकाः श्री रामाचार्याः	१
२)	मासावतरणिका	"	१
३)	संपादकीयम्	"	२
४)	अश्वधाटीकाव्यम्	"	४
५)	दृष्टिदानम्	पंढरीनाथाचार्यः	५
६)	स्वतन्त्रभारतोदयः	श्री राजकवि के. एस्. कृष्णमूर्तिशास्त्री मद्रास	९
७)	विचित्रं लग्नघटीयंत्रम्	स्वामी लक्ष्मणशास्त्री नागौर मारवार	१३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111033

मधुरवाणी

२४ वर्षे) विकारि संवत्सर ज्येष्ठाङ्कः (अङ्कः ३

मङ्गलाचरणम्

राधे त्वं शरणं प्रयाहि न चिरात्, नाथ त्वमेवासि तत्
कान्ते शान्ततमं निशान्तमधुना किन्तेऽनभीष्टं परम् ।
का वा वल्लभकेलिलालसमना अन्तं निशाया लषेत्
एवं माधवराधिकारसललच्चाटूक्तयः श्रेयसे ॥ १ ॥

राधानुषक्तमपि मामपराधिकं त्वं
जानासि मातरधुना न हि चित्रमेतत् ।
सन्तोषकारिणमपि स्मरतां जनानां
सन्तो वदन्ति सुधियोऽपि जनार्दनं माम् ॥ २ ॥

चौर्यं भूरि कृतं त्वयैव भगवन् भुक्ताः परा योषितो
मण्डं वा नवनीतमेवमशितं दुग्धं च पीतं बहु ॥
बन्धूनां निवहो हि निर्दयतया भूयो मया हिंसितः
त्वं लोकैरभिपूज्यसेऽच्युत कुतो निंद्ये च कस्मादहम् ॥ ३ ॥

मासावतरणिका

लोकानां वदनेषु नीलिमभरो नेत्रेषु धाराऽम्भसो
जाराणां रतिमन्दिरेषु चपलालीलाविलासोदयः ॥
मेघनागमनेऽपि तद्गुणगणस्तैन्येन नैच्यं वहन्
मासोऽयं जगतीतले भजति हा 'ज्येष्ठ' प्रतिष्ठां चिरात् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्विंशे वत्सरे मधुरवाणी

वन्दारुजनमन्दारतरोर्वृन्दारकवृन्दगुरोर्भगवतो नन्दनन्दनस्येन्दिराप्रणयिनो मुचुकुन्दवरदस्य मुकुन्दस्य मन्देतरकरुणारसनिष्यन्दिना कटाक्षेण, महानीयोदारचरितानामसामान्यया वदान्यतया, गीर्वाणवाणीप्रसरणैकप्रदर्शितपरमाग्रहाणां ग्राहकाग्रेसराणां निरवग्रहेणानुग्रहेण चाद्य बाला मधुरवाणी चतुर्विंशवत्सरप्राङ्गणसीमानमुपस्पृशतीति हन्त वाचकानामिव प्रमोमुदीति नश्चेतः ।

कमलाकटाक्षागोचराणामस्माकं प्राणेभ्योऽपि प्रेयसी वत्सा मधुरवाणी सुलभापायमसुलभोपायं इयत्समयं कथं वा सुरक्षितमतिक्राम्येदिति बलवती चिन्ता चिरादग्रसीन्नश्चित्तम् । एकतो धर्मविरोधिनां कटुकालकूटकुटिलतीक्ष्णः कटाक्षः कवलयितुमुदसहत । अपरतः पण्डितम्मन्यानां कूपमण्डूकायमानानां परोत्कर्षासहिष्णूनां महानुभावानां मत्सरानलो दग्धुमुदयुङ्क्त । अन्यतश्च निजागाधपाण्डित्य(?) प्रतिफलतया विना मूल्यमपेक्षमाणानामलब्धमनोरथतया प्रक्षुब्धचेतसां महाशयानां दूषणदन्दशूका दष्टुमचेष्टन्त । इतरतश्च प्रथितयशसां विदुषामौदासीन्यव्याधिर्बाधितुमुपाक्रमत । परतश्च कपूयकृत्येष्वपि जलधारावर्षं धनराशिं वर्षतां सुरसरस्वतीस्वारस्यमजानतां महोदाराणां साहाय्यविरहो वेदनामुपाजनयत् । एकतश्च संस्कृतसाहित्यमर्मविदामपि केषांचन धनैकप्राणानां कृपणताकृपाणः प्रहर्तुं प्रायतत । वर्षमेकं वर्षद्वयं वर्षत्रयं वा तूष्णीम्भावेन सकलाः सञ्चिकाः सादरं स्वीकृत्य सशुल्कपत्रस्याऽप्युत्तरमदत्वा 'व्ही. पी.' परावर्तनेन प्रकटितनिजमहात्मतापरकाष्ठानां सदा स्मरणीयनामधेयानां सद्भि(?)रनुकरणीयचरितानां महामहामहानुभावानामुत्तेजनतेजो भस्मसादेव कर्तुमजागरीत् । मधुरवाण्या जन्मतः प्रभृति सदयं साहाय्यं विधाय 'मध्ये कान्तारं' 'मध्ये जलं' वा त्यक्तकराणां केषांचन सहृदयालूनामवकृपासिलता च्छेत्तुमुपासरत् । केवल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधीतसंस्कृतानां विद्यार्थिनां वाचनाननुरागग्रहो ग्रसितुमग्रहीत् । वैदिशिकविद्यालेशदुर्विदग्धानामवहेलनाझञ्जानिलः समूलमुन्मूलयितुं सवेगमवात् ।

एकान्ततो विषमेऽस्मिन्समये केचन वस्तुतो महामनसश्चोदाराः पीठाधिपतयः परमहंसाः सत्यप्यनानुकूल्ये तदविगणय्य सुरवाणीप्रेम्णा यदि निजवरदकरावलम्बं न व्यतरिष्यन्, सारासारविचारचतुराः वाचकवरेण्या यदि सक्रियां सहानुभूतिं नादर्शयिष्यंस्तर्हि स्वभावभीरुस्तपस्विनी वत्सा मधुरवाणी चतुर्विंशवर्षप्रासादमधिरूढा न प्राभविष्यदात्मनश्चैवंभूतं वृत्तान्तमावेदयितुम् ।

भगवतः करुणाकरस्यव्रजकिशोरस्य सकलाभीष्टप्रसवप्रसादमहिम्ना निस्तीर्णनिखिलविपज्जाला मधुरवाणी चतुर्विंशवत्सरेऽधुना कृतपदा पूर्वतोऽपि सविशेषममरभारतीपरिचर्यया वाचकमनांस्यावर्जयितुमुत्सहते । तदुत्साहस्थिरीकरणवर्धनादिकं सर्वथा सहृदयवाचकसहजकारुण्यायत्तमिति न खलु निवेदनमावश्यकम् । निर्दिष्टाः पूर्वं सर्वे जना यदि सकलश्रेयस्साधनसुरसरस्वतीसमुन्नत्यपेक्षया निजवरदकरकमलं मुष्टीकृतमीषदपि विकास्य पुरःप्रसारयेयुस्तर्हि मधुरवाणी चिराय कृतज्ञा हृष्टा पुष्टा च शक्नुयादेव रसिकवाचकजनवाचन पिपासावर्धनेनात्मनो जनुः सफलयितुम् ।

अयि प्रेष्ठाः पाठकश्रेष्ठा, यदि रुचिता मधुरवाणीसेवा यदि सत्यमपेक्षितो देवभाषाप्रसारस्तर्हि प्रत्येकशोऽधिकग्राहकाः सङ्ग्रह्यन्ताम् । प्रहीयन्तां सरसतमाश्च लेखाः । उपदिश्यतां च समुचितः पन्थाः । आविष्क्रियतां निजाभिलषितम् । प्रोत्साह्यतां च वत्सा मधुरवाणी देशभाषापत्रिकासमानस्कन्धताप्रापणेन । अवनाम्यतां च संस्कृतदूषकवदनानि । स्वीक्रियतां च सप्रणयमविगणितदोषं सम्पादकानामल्पा सेवा । इत्यावेद्य सम्प्रार्थ्य च विरम्यत इदानीमिति शम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशौरिःशरणम्

श्रीअश्वघाटीकाव्यं

(श्रीरामकृतम्)

शम्पासमं धनचयं पातहेतुमिह सम्पाद्य किं फलमहो
किं पाति तच्च यमझम्पाप्रदानभवकम्पादुदित्वरभयात् ।
त्वं पामराधम परं पारमिच्छसि भृशं पातकोदकनिधे-
स्तं पावनान्नतनिलिम्पावनोद्यदनुकंपाकराद् वृणु वरम् ॥ १ ॥

लम्बालकां रतिविलम्बासहो मधुरबिम्बाधरां कुचतटी-
सम्बाधचारुसुषमां बालिकां गुरुनितम्बावहामभिलषन् ।
त्वं बालिशीभवसि किं बाह्यभोगनिरतोऽम्बालिकार्थितसुतं
तं बादरायणमुनिं बाढमाश्रितकदम्बामरद्रुमय रे ॥ २ ॥

रण्डाः परामृशसि चण्डाल विप्र भुवि कुण्डान्बहून् जनयसे
पण्डावतां धुरि वितण्डा विधाय बुधशौंडायसे बत कथाः ।
दण्डाद्बिभेषि यदि चण्डाद्यमस्य गुणभाण्डालयं यदुशिशुं
मण्डानुलेपसिततुण्डाब्जमेहि करिशुण्डायतोरुमयनम् ॥ ३ ॥

भृङ्गालकां वनकुरङ्गार्भकायतदृशं गाढयौवनभरां
किं गाहसे भृशमनङ्गातुरः सरसशृङ्गारमुग्धहृदयः ।
अङ्गारभासमभिषङ्गावलेपविधुरं गायमानकमलाऽ-
पाङ्गावलोकिततुरङ्गाननं दुरितभङ्गाय संश्रय विभुम् ॥ ४ ॥

नीचाग्रणीषु बहुधा चारणोऽभवमनूचानवंशजनितः
शोचामि मामिह हि शौचातिदूरकलुषाचारभाजमनिशम् ।
श्रीचारुवक्त्र कमलाचातकीघन हरे चापभूषित सदा
वाचा त्वदर्थनकलाचातुरीं प्रदिश मे चाटुसल्ललितया ॥ ५ ॥

वैराभिवेशहृतधीरार्यलोकमनुदारात्मना छलयतो
घोरापदां नरककारागृहेषु परिहाराय कस्तव भवेत् ।
वाराशिजानयननीराजितं करुणपूरार्द्रमानसमतो
नारायणं दुरितभारापहं सततमाराधयस्व मनसा ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्टिदानम् ।

"अल्लख् निरंजन, अल्लख् निरंजन, अल्लख् निरंजन" इति उच्चकण्ठेन गर्जन् कश्चन तरुणसाधुः काशीपट्टणस्य राजमार्गं प्रविशति। तस्य हस्ते धृतस्य पुरःपश्चाच्च भ्राम्यमाणस्य दण्डस्य किङ्किणीनिनादः बालकान् आकर्षति। तरुणवयसः तस्य तेजस्विनः विरागिणः मुखे अपूर्वा एव काचन कान्तिः विलसति ।

किं कामः कापालिकः जातः ? अथवा सोमः सन्यासी संवृत्तः ? उत सनत्कुमार एव साक्षादवतीर्णः ? आहोस्वित् श्रृंगार एव साकारो बभूव ? किमथवा ब्रह्मचर्याश्रम एव शरीरबद्धः सञ्चरति ? इति जनानां मनसि तं कामाभिरामं सर्वाङ्गसुन्दरं योगिनं दृष्ट्वा शङ्काः उत्पद्यन्ते ।

"अल्लख् निरंजन, अल्लख् निरंजन" इति स्निग्धगम्भीरम् उच्चरन् सः राजमार्गे प्रत्येकगृहस्यापि पुरतः निमिषार्धं तिष्ठति घण्टां च वादयति । लभ्यतां न लभ्यतां वा भिक्षा । तद्गृहस्थानां आशीर्वादं प्रदाय गृहान्तरं गच्छति सघण्टाघोषम् ।

राजमार्गे तस्य घण्टाकिंकिणीनां झण् झण् निनादेन आकृष्टाः बहव एव बालकाः तम् अनुसरन्ति । प्रौढाः नागरिका अपि तस्य मुखे उद्रिच्यमानं ब्रह्मतेजः विलोक्य क्षणं चकिताः स्तम्भिताश्च भूत्वा निर्निमेषं पश्यन्ति तमेव । भिक्षाप्रदानाय स्वगृहदेहलीमागताः कुलवध्वः अपि तस्य साधोः मुखसौंदर्यं नेत्रकान्तिं देहसौष्ठवं अङ्गरागं च दृष्ट्वा क्षणं कर्षिता इव धर्षिता इव हर्षिता इव तिष्ठन्ति । पुनः प्राचीन संस्कारबलेन आत्मानं संयम्य भिक्षां प्रदाय तद्दत्तां शुभाशिषं सश्रद्धं स्वीकुर्वन्ति ।

एवं संचरन् स विरागी कस्यचन लक्ष्मीपुत्रस्य श्रीलस्य भव्यं प्रासादं उपसर्पति । तदा नानावेषभूषादिधारिणी तरुणीमणिः तद्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहस्वामिनी तस्य भिक्षोः "अल्लख् निरञ्जन् अल्लख् निरञ्जन" इति सघण्टाघोषंनिशम्य धान्यं गृहीत्वा बहिरायाति। तत्रैव स्थितं च स्वभृत्यं प्रति "अरे किङ्कर अयं विरागी साधुः अपि परपुरुषः। कथमहं पतिव्रता सती परस्मै पुरुषाय स्वहस्तेन धान्यं दास्यामि? अतः त्वमेव एतत्तस्मै देहि" इति उक्त्वा तेन दापयति।

तस्याः स्वपातिव्रत्यप्रख्यापकं ईदृशं वाक्यं श्रुत्वा ईषद् विस्मितः सःयोगी किञ्चिदुदञ्चितनयनाञ्चलं तां ईक्षते।

तस्य नयनज्योतिः दृष्ट्वा तस्याः सुन्दर्याः चित्तं चञ्चलितं भवति।

"अहो अपूर्वं सौन्दर्यं अस्य योगिनो नयनयुगलस्य। त्रिभुवन-लावण्यमेव अत्र संचितं विधात्रा। कमलकुमुदादीनि अस्य साधोश्चक्षु-श्चारुतायाः शततमीमपि नार्हन्त्येव कलाम्। अहो पक्षपातो विधेः विषय पराङ्मुखेषु विरक्तेषु यदेतेषामेव रागरसरहितानां चक्षुश्चषकेषु तरुणी-गणतरल चेतस्तर्पणचणं अमृतरसं निदधाति" इति मनस्येव चिन्तयन्ती निर्निमेषं तमेव अतृप्तेव क्षुधितेव तरलितेव उत्कण्ठितेव पश्यति।

स च विरागी भृत्यदत्तं धान्यं गृहीत्वा अलख् निरञ्जन् इति वदन् गृहान्तरं प्रस्थितः।

सापि सुदती तस्मिन् राजमार्गे यावत्तिरोधानं तमेवं दृष्ट्वा सुदूर गते च तस्मिन् गृहान्तः आगच्छति।

वस्तुतस्तु सा साध्वीशिखामणिः पतिव्रताशिरोमणिश्च आसीत्। अद्य तु तस्य विरागिणः नेत्रनिष्ठं लोकोत्तरसौन्दर्यं दृष्ट्वा तस्याः चित्ते तात्कालिकं किञ्चिदिव चांचल्यं उदञ्चितमासीत्। परं गृहान्तरागमन क्षण एव तस्याः महान् पश्चात्तापः संभवति।

"अहो धिङ्मां तरलहृदयाँ असतीम्। धिग्धिक्च मच्चित्तं यत्क-स्यापि तरुणभिक्षोःभ्रूविक्षेपमात्रेण वाताहतदीपवद् दोलायमानं भवति। इदानीमेव निगृहीतव्यं नियन्त्रितव्यं च उच्छृङ्खलमिदमविवेकि मम मनः। क्षमस्व पतिदेव! दयस्व सावित्रि! अपेहि मन्मथ। उपेहि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुविवेक । अहं अद्यैव शपे पतिनाम्ना । "श्वः पुनः यदि सः विरागी भिक्षार्थमागच्छेत् नदा नाहं बहिर्गमिष्यामि, न भिक्षां दास्यामि, न तन्मुखं द्रक्ष्यामि न सतीत्वं च त्यक्ष्यामि" इति मनस्येव प्रतिजानाति । "श्वः यदि सः विरागी भिक्षार्थमागच्छेत् तदा त्वमेव धान्यं देहि । मम तद्वार्तामपि मा निवेदय" इति गृहपरिचारकम् आदिशति च ।

परेद्युः नियतकाले पुनश्च श्रूयत एव "अल्लख् निरञ्जन अल्लख् निरञ्जन" इति घण्टाकिङ्किणीनादमिश्रः मधुरस्वरः । तं श्रुत्वैव तस्याः सुदत्याः उत्सुकितं उत्कण्ठितं उल्लसितं तरलितं च हृदयम् । चञ्चलितं चक्षुः रोमाञ्चितं वपुः स्फुरिता च भ्रूलता विस्मृता प्रतिज्ञा । तत्क्षण एव सा स्वयमुत्थाय परिचारकस्य हस्तात् धान्यशूर्पमादाय विस्रंसमानं दुकूलं मुहुर्धारयन्ती पुरस्सरति । बहिरागत्य च साधोः भिक्षाकपाले स्वहृदयमिव धान्यं निक्षिपति । "त्वं सौभाग्यवती भव" इति सः विरागी मुखमुद्धृत्य तामेकवारं दृष्ट्वा आशीर्वादं कृत्वा पुरश्च चलितुं पादमुद्धरति.....

परमत्रान्तर एव तस्य रमणीयनयनरश्मिभिः बलादाकृष्टेव आवर्जितेव च परवशा सा सुदती मोहात्तं आव्हयति 'तिष्ठ रे साधो तिष्ठ' इति । तदा सः कुतूहलगर्भं नयनतारकं विस्फार्य तामवलोकयति ।

तदा सा "योगिराज ! तव लोकविलक्षणसौन्दर्यपात्रयोः अनयोः नेत्रयोः कीदृशोयं शोभा ! कियती चेयं कामिनीजनचित्तविक्षोभिणी सुषुमा ? का वा कुतो वा तवेयं त्वरा ? केवलं पञ्चषनिमिषान् तवैतन्नयनकमले उन्मीलयित्वा मम पुरः तिष्ठ । नाहमधिकमितःकिमप्यपेक्षे । प्रतिदिनमेवं पञ्चनिमिषान् मदुपरि तव दृष्टिपातं कुरु । तवोदरपूर्तिपर्याप्तं धान्यं अहमेकैव दास्यामि । नान्यत्र देहीति ब्रूहि । आतपे माऽत्र नगरे गृहाद्गृहं मुष्टिधान्यार्थमाहिण्डस्व वृथेतस्ततः" इति

तस्याः तद्वचनं श्रुत्वा लज्जित इव अधोवदनो योगिवरः 'अल्लख् निरञ्जन्' इति वदन् निर्गच्छति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्येद्युः तन्नयनकान्तिमुग्धा सा अङ्गनामणिः प्रातःकालादारभ्य योगिनःस्वागतसिद्धतां कर्तुमुपक्रमते। अभ्यंगस्नानं कृत्वा नववधूवेष-भूषादिभिः आत्मानमाभूषयति। तस्य तरुणसाधोः दिव्यकान्तिसमुद्भा-सितं शतचन्द्रसौन्दर्यविनिन्दकं मुग्धमनोहरं मुखमण्डलं, तत्रापि तस्य दिव्यचक्षुः तस्याः हृदयफलक एव चित्रितमिव लिखितमिव उट्टंकितमिव च आसीत्। अद्य सा प्रभूतं धान्यं प्रदाय तस्य लोचनलावण्यरससर्वस्वं यथेच्छं पातुं निर्धरति।

नियतसमये श्रूयते घण्टिकानिनादः, अल्लख् निरञ्जन् इति मधुरध्वनिश्च। तत्क्षण एव च सा अङ्गनामणिः मन्दहाससुन्दरानना विकसितनयनेन्दीवरा मन्दंमन्दं मन्दिरद्वारमुपसीदति साक्षादिन्दिरेव मुकुंदसन्दर्शनलालसा। दूरादेवावलोकयति स्वहृदयहारिणं विरागिणम्।

परं किमेतत्! अद्य तं साधुं द्वौ तच्छिष्यौ बाहुभ्यामादाय चाल-यन्तौ आनयतः। तदवलोक्य चकितेव चालितेव कशाहतेव च आधाव्य तद्योगिनः समीपमुपसृत्य सा चकोराक्षी पृच्छति "साधुवर! किं जातम्! कुतो वा स्वयं चलितुं न शक्नोषि?" इति।

स साधुः शान्तस्वरेण "सतीमणे गृहाणैतत्" इत्युक्त्वा तस्याः करतले स्थालीमेकां प्रयच्छति।

सा च यावत्स्थालीमादाय पश्यति तदा तस्याः स्थाल्याः तले द्वे नयनगोलके थल् थल् थल् प्रकाशेते।

"पतिव्रते!" गम्भीरस्वरेण साधुः तां संबोधयति "ह्यः त्वं मम नयनयोः मुग्धा भूत्वा तद्वर्णनां कृतवत्यासीः। त्वत्सदृश्याः परमपति-व्रतायाः मनश्चांचल्यकरे एते उभे चर्मचक्षुषी उत्कृत्य आनीतवानस्मि। एकस्याः साध्व्याः सतीत्वविनाशकयोःअनयोः मन्नयनयोः एतदेव योग्यं शासनं। तवापि तत्र महानेव हि आसील्लोभः। तदिमे गृहाण चर्म-चक्षुषी" इत्युक्त्वा "अलख् निरंजन् अलख् निरंजन्" इति वदन् निर्वि-कारः निर्गच्छति ततो मन्दंमन्दम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा तस्याः हृदि ज्ञानोदयो भवति । स्वस्य दृष्टिं बलिं दत्वा तस्याः अन्तर्दृष्टिं विकासयति स महात्मा । स्वयमन्धो भूत्वा तां चक्षुष्मतीं कृत्वा परामेव निर्वृतिमाप्नोति सः साधुशिखामणिः । अहो महात्मता भारतीयसत्पुरुषाणाम् ।

श्रीः

॥ स्वतन्त्रभारतोदयः ॥

भारतविद्यागौरववर्णनं नाम द्वितीया विंशतिः ।

(निबन्धा— म-म- के. एस्. कृष्णमूर्तिशास्त्री, मदरास.)

वेदान्प्रादुरबीभवत्करुणया नारायणो ब्रह्मणे
सृष्टौ दृष्टिमुपेयुषे स्वजनुषेऽशेषार्थवित्तोषितः ।
नित्या ज्ञानसहस्रभानव इमे त्रैलोक्यमोहाह्वय-
ध्वान्तध्वंसपटीयसा प्रविलसन्त्यत्रैव हि ज्योतिषा ॥ १ ॥

शिक्षा व्याकरणं मुखं निगदितं छन्दो निरुक्तं तथा
कल्पो ज्यौतिषमित्युदध्युपमितैरङ्गैश्च षड्भिर्वृतः ।
एकैकोऽपि महान्हि वेदपुरुषःकूपीकृताम्भोनिधिः
स्पर्धीवोरुगरिम्ण्यहो विजयते विश्वम्भरेण ध्रुवः ॥ २ ॥

मात्रावर्णस्वराणामवहितहृदयैर्भाव्यमुच्चारणेषु
भ्रंशे तु प्रत्यवायः पदमपि निखिलं रुद्धपर्यायवृत्ति ।
वाक्यस्थानां पदानां क्रमनियतिरथो देशकालाधिकारा
नैवोल्लङ्घ्याः श्रुतिष्वित्ययमपि विषयो देशभेदेऽप्य-
भिन्नः ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्तत्पूरुषबुद्धिभेदमनुसृत्यापीश्वरो भिद्यते
कैश्चिन्नाभ्युपगम्यते कतिपयैरेकःस इत्युच्यते ।
इत्थं विप्रतिपत्तिभिः स भगवान्सर्वात्मना क्लेश्यते
नैवं तद्विनिवेदनैकरसिका माता श्रुतिर्दुस्थिता ॥ ४ ॥

श्रुत्यर्थानुगृहीतसत्स्मृतिगणैर्गुण्येतिहासैःसमैः
आर्षैर्लक्षणपञ्चकाञ्चितपुराणैर्दर्पणैरद्भुतैः ।
विश्वस्माद्भुवनाद्बृहद्भिरदसीयैः शब्दशास्त्रादिभिः
वेदो वाङ्मनसातिगात्ममहिमा देदीप्यते बृंहितः ॥ ५ ॥

नादब्रह्ममयो हि नारदमुनिर्ज्ञानक्षुधःशान्तये
प्रह्वो भूरि सनत्कुमारमुपसद्य स्वस्य सर्वज्ञताम् ।
आत्मज्ञानमृते, व्यजिज्ञपदिदं छान्दोग्यतःश्रूयते
तत्रानुक्रमणीमधीध्वमिह वो विद्याःकतीतिस्फुरेत् ॥ ६ ॥

आत्मज्ञानमहो ! इहैव सुलभं नान्येषु लोकेष्विदं
यत्र प्राप्तुमपि क्षमं स तु दुरापःसत्यलोकश्च नः ।
प्राप्येताप्युपदेशनं तु सुमहत्प्रायो विधेर्दुर्ग्रहं
तस्मात्सद्गुरवोऽत्र लब्धजनुषो वैदेशिकानामपि ॥ ७ ॥

पाश्चात्योपक्रमं यद्वचणुदळनसमुत्थोग्रशक्त्यस्त्रजातं
सर्वं तद्वचर्थमस्त्वित्यृषिवचसि सति स्याद्ध्रुवं तत्तथैव ।
तन्मात्राणां विजेतृन्सहसमभुवनैर्योगशक्त्याःप्रभावा-
त्सर्वज्ञान्सर्वशक्तान्प्रति वत ! वदितुं के वयं मांस-
पिण्डाः ॥ ८ ॥

साङ्ख्यञ्चाकथि पञ्चविंशतिसतत्त्वज्ञप्तये कापिलं
श्रीपातञ्जलदर्शनं तदणिमाद्यष्टात्मभूत्याप्तये ।
धर्माधर्मविनिर्णयाय च बृहच्छास्त्रं मुनेर्जैमिनेः
दाक्षीपुत्रकणादगौतमगिरःशब्दार्थसंवित्तये ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षट्सन्त्यास्तिकदर्शनानि न इह, प्रत्यर्थिभूतानि षट्
पूर्वाणि श्रुतियुक्तिमन्ति च पराण्युद्दामतर्काण्यपि ।
एकैकं विजिगीषु वर्धितचरं स्वस्वोरुसंस्पर्धिना
धीवैशद्यकृते श्रयद्भिरनघैर्जल्पं वितण्डां तथा ॥ १० ॥

तत्तद्वैयक्तिकविटपसंश्लेषकूजद्द्विजौघाः
प्राप्तोच्छ्राया अपि फलभरैर्भूरि नम्रा ऋगाद्याः
स्वर्वृक्षा नःसकलविषयग्रन्थजातोपजीव्या
अज्ञातावश्यकविषयकज्ञानभानूयमानाः ॥ ११ ॥
(विषयो देशः । श्लिष्टपद्यमेतत्)

कर्मोपासनसंविदेकपरतामात्रं न च च्छन्दसां
शृङ्गारं रससार्वभौममममलं ह्युल्लासयन्त्यद्भुतम् ।
ऋग्वेदे परिदृश्यतामिदमुषःसूक्त्यादिषु, प्रोज्ज्वला
काव्यश्रीर्ललिता चमत्कृतिचयैरुन्नृत्यतीव स्फुरेत् ॥ १२ ॥

वाकोवाक्यप्रहेळीबृहदबृहदुपाख्यानकर्मावबद्धो-
पास्तिब्रह्मात्मबोधत्रिविधविधिनिषेधार्थवादैर्हि वेदः ।
प्रेयःश्रेयःस्वरूपं तदधिगमविधावभ्युपायानवन्ध्या-
निन्धे दीनैकबन्धुःशुभबिबुधगिरा बोधयन्भारते नः ॥ १३ ॥

प्रत्यक्षर्क्षग्रहेन्द्वर्यमविविधगतिस्थित्युदक्साक्षिकत्वा-
ज्ज्योतिःशास्त्रं सुसूक्ष्मेक्षिकबुधमणिदृक्प्रेक्षितत्वादपेक्ष्यम् ।
अत्रेवान्यत्र देशेष्वपि रुचिजनकत्वाच्च बह्वादरार्हं
बीजक्षेत्राद्यनेकाश्रयगणितबृहद्विद्ययाऽऽश्लिष्टमास्ते ॥ १४ ॥

धर्मे वर्णाश्रमसमुचिते संस्थितानां जनानां
नाधिव्याधी स्त इति सुचिरंजीविभिस्तैर्हि भाव्यम् ।
एभ्योऽन्यत्र प्रभवदपि तद्भारते नार्षमात्रं
किन्तूपज्ञातमपि विविधं वैद्यकं नैकसिद्धैः ॥ १५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेदःसपदि फलदं वक्ति भैषज्यजातं
सिद्धोपज्ञैरपि बहुविधैरौषधैःसंप्रवृद्धम् ।
वर्षोऽस्माकं स्वयमह ! महामन्त्रमण्योषधीस्ता
बह्वाब्देभ्योऽन्यविषयमपेक्ष्योपजज्ञे हि पूर्वम् ॥ १६ ॥
(विषयो देशः)

गर्भस्थजन्तोरिव शल्यकृन्त
इत्यूचिवानादिकविःस्वकाव्ये ।
न नूतनं शस्त्रचिकित्सनं नः
किञ्च व्यभादत्रकुमारभृत्यम् १७ ॥

वर्षेऽस्मिन्भरतो मुनिश्च पदवाक्यार्थाभिनीत्यात्मकं
चक्षुःप्रीणननाटचनर्तनविधीन्सूत्रैर्न्यबध्नात्स्वयम् ।
गानैःकर्णरसायनैः श्रुतिलयानुस्यूतवाद्यक्वणै-
र्मिश्रं नृत्तमुरुस्फुरद्रसभरं तौर्यत्रिकं गीयते ॥ १८ ॥

रागस्तालश्रुतिसमनुगो वाद्यराजोपजीव्यः
कण्ठान्निर्यन्ननुरणनवान्मूर्छनायां मनोज्ञः ।
मर्त्यान्संमोहयति न परं किन्तु पोतांस्तिरश्चः
क्रूरान्सर्पानपि नवरसस्फोरणैकप्रवीणः ॥ १९ ॥

तन्त्रीवाद्यतया प्रसिद्धममितैर्भेदैर्विपञ्च्यादिकं
वंशस्तिर्य*गतिर्यगन्यदमितं वाद्यं तथा सौषिरम् ।
शङ्खंशृङ्ग मुरुश्रुतेश्च जनकं भस्त्रादिवाद्यं तथा
नानाकृत्यपि चर्मवाद्यमतिसंख्याकं मृदङ्गादिजम् ॥ २० ॥
(*तिर्यग्वाद्यमानत्वाद्वंशस्यतिर्यक्त्वं, तथा=सौषिरम् ।।)

चित्रं चारुविचित्रमद्भुततरं शिल्पं तथाल्पेतर-
द्दृश्यश्रव्यसुकाव्यनिर्मितिरिति त्रय्यप्यसाधारणी ।
इत्थं नागरिके पथि स्थितवतामारभ्य कालाद्वहो-
रस्माकं ह्युपदेष्टुमत्रभुवने नैवास्ति देशःपरः ॥ २१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचित्रं लग्नघटीयन्त्रम् ।

(अत्यद्भुतो नूतनश्चाविष्कारः)

लेखक— स्वामी लक्ष्मणशास्त्री, संस्कृतविद्यालयस्य अध्यक्ष ।
नागौर (मारवार)

श्रीमन्तः संस्कृत–मधुरवाणीपत्रपाठकमहोदयाः !

वियति भवद्भिः कदाचिद् अवलोकितमेव, यद् उदीच्यां ध्रुवनाम्नी तारका एका अस्ति । सा सर्वदा एकत्र एव तिष्ठति । तारकान्तरवत् सा न भ्रमति । तस्याः ध्रुवतारायाः बहिः परितः किमपि तारकाद्वयं सदा भ्रमति । तद् तारकाद्वयं ध्रुव तारायाः परितः प्रदक्षिणां विदधद् भ्रमति । समये समये संसूचयित्र्याः अस्याः अलौकिकघटचाः केन्द्ररूपा ध्रुवतारा अस्ति । कररूपं च तत् तारकाद्वयं स्वपरिभ्रमणेन निम्नोक्तपद्यानुसारतः दर्शकेभ्यः समयं संसूचयति ।

तुलालग्नं प्राच्यां दहनविदिशायामलिधनू,
यमाशायां नक्रो घटतिमितनू यातु विदिशि ।
प्रतीच्यां मेषांङ्गं वृषभमिथुने वायुविदिशि,
ह्युदीच्याँ कर्काङ्गं हर विदिशि सिंहोऽथ युवतिः ॥

अस्य पद्यस्य निष्कर्षस्त्वयम् । यदा कररूपं तत् तारकाद्वयं केन्द्ररूपायाः ध्रुवतारायाः पूर्वस्यां दिशि वर्तते, तदा तुलालग्नं भवति, आग्नेय्यां यदा वर्तते तदा वृश्चिकधनुर्लग्ने भवतः । एवं दक्षिणस्यां दिशि मकरलग्नम्, नैर्ऋत्यां कुम्भ-मीन-लग्ने पश्चिमायाँ मेषलग्नम्, वायव्यां वृषभ-मिथुन-लग्ने, उत्तरस्यां कर्क-लग्नम्, ऐशान्यां सिंह-कन्या-लग्ने भवतः । इदं परमेश्वरनिर्मितं विचित्रं समयप्रदर्शकं घटीयन्त्रम् अस्ति । नाद्यावधि कस्मिश्चन ज्योतिषग्रन्थे अस्य घटीयन्त्रस्य वर्णन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुपलब्धम् । अयं ध्रुवतारारूपेण दृश्यमानो ध्रुवलोकः अस्ति । यत्र ब्रह्मणः प्रपौत्रः स्वायम्भुवस्य मनोः पौत्रः उत्तानपादस्य राज्ञः पुत्रः ध्रुवः तिष्ठति । यः ध्रुवः पञ्चवर्षवयसि एव श्रीविष्णुं प्रसाद्य तं लोकं प्रपेदे ।

एतद् विषये श्रीमद्भागवतस्य चतुर्थस्कन्धे अष्टमाध्यायाद् आरभ्य द्वादशाध्यायपर्यन्तं वर्णितं ध्रुवाख्यानं पाठकानां मनसः विनोदाय सङ्क्षेपतः संस्कृतभाषायाम् अनूद्य वर्ण्यते अत्रापि ।

पुरा सृष्ट्यादौ श्रीविष्णोः नाभिसरोरुहाद् ब्रह्मा अभूत् । तस्य देहाद् स्वायम्भुवो मनुः तत्पत्नी शतरूपा च बभूवतुः । स्वयम्भुवस्य शतरूपायां प्रियव्रतः उत्तानपादः च पुत्रद्वयं जज्ञे । उत्तानपादस्य सुनीत्यां ध्रुवः सुरुच्यां च उत्तमः जातः । सुरुचिः पत्युः विशेषतः प्रिया आसीत् ।

अन्येद्यू राजा सुरुचेः पुत्रं उत्तमं स्वस्य अङ्के आरोप्य लालयति स्म । तदा एव दैववशात् तत्र ध्रुवः अपि समायातः । ध्रुवः स्वभ्रातरं उत्तमं स्वपितुः अङ्कगतं समीक्ष्य स्वयम् अपि पितुः अङ्कं आरोढुं अतितराम् उत्सुकः अभूत् । नृपस्तु स्वसमीपम् उपविष्टायाः सुरुचेः भयाद् ध्रुवं स्वाङ्के उपवेशयितुं न ऐच्छत् । तदपि निबंधेन पितुः अङ्कं आरोढुकामं ध्रुवं आलोक्य सगर्वं सा तम् उवाच ।

"वत्स ! त्वं राजासनं आरोढुमिच्छन् न त्रपसे । बालत्वाद् विचारविधुरः असि । कुतः तव एतादृशं भाग्यम् ? केवलं मदुदराद् लब्धजन्मा एव राजासनमारोढुम् अर्हति । यदि त्वं अपि राजासनम् आरोढुम् इच्छसि, तर्हि परमेश्वरं प्रसाद्य तस्य अनुग्रहेण त्वं मम उदराद् जन्म लभस्व । प्रयाहि ! मा वृथा प्रयासं कार्षीः !!" पितुः समक्षम् एव विमातुः एतद् वचः श्रुत्वा क्षुब्धः ध्रुवः स्वमातुः अन्तिकम् अगमत् । माता अपि रुषा निःश्वसन्तं स्वसुतं स्वाङ्के उपवेश्य पौरमुखात् च निशम्य सुरुच्याः सगर्वां दुरुक्तिं श्रुत्वा धीरचित्ता अपि त्यक्तधैर्या सुतराम् अरोदीत्, अब्रवीत् च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"वत्स सुरुच्या उक्तम् अखिलम् अपि सत्यम् अस्ति। लेशतः अपि तत्कथनं न मृषा मन्ये अहम्। राजा माम् भार्या इति वक्तुम् अपि जिह्रेतितमाम्। ईदृग्दौर्भाग्यवत्याः मम उदरात् लब्धजन्मा त्वं कथं राजासनम् आरोढुं उत्कण्ठितः असि।

यदि त्वं राजासनमेव आरोढुम् इच्छसि, तर्हि श्रीजगदीश्वरं तपसा प्रसादय। तत्प्रसादाद् एव ब्रह्मादयः अन्यदुर्लभं पदं आप्तवन्तः। तदनुग्रहेण च न किमपि पदं वस्तु च जगति दुर्लभमस्ति। तदनुकम्पया नीचातिनीचः अपि जनः उच्चतमं पदं लब्धुं शक्नोति। न कः अपि अपरः परमेश्वराद् प्रभवति तव एतद् दुःखम् समूलम् उन्मूलयितुम्।"

निशम्य एतद् मातुः वचः पंचवर्षवयस्कः अपि ध्रुवः सहसा एव सन्त्यज्य सुदुस्त्यजं बन्धुव्रजं निश्चक्राम स्वपितुः पुरात्। पथि दैवात् सङ्गतेन देवर्षिणा नारदेन उपदिष्टः जाप्यमन्त्रः। ध्रुवः मधुवनं गत्वा तत्र विनिद्रः निराहारश्च अहर्निशं श्रीनारदोपदिष्टमार्गेण श्रीहरिं दध्यौ। तस्य उग्रतपसा त्रिभुवनम् अकम्पत। तस्य तपसा अति तुष्टः स्वभक्त-वत्सलः श्रीविष्णुः गरुत्मन्तं आरुह्य तत्र आगात्। बालत्वात् वक्तुम् अशक्तः अपि ध्रुव तं स्तोतुमु अतितराम् उत्कण्ठितः अभूत्। तदभिज्ञाय चित्तज्ञः असौ श्रीहरिः सर्ववाङ्मयेन स्वशङ्खेन पाञ्चजन्येन तस्य कपोलयोः पस्पर्श। तदैव अवाप्तलोकोत्तरवाग्विभवः ध्रुवः

"योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान् नमो भगवते पुरुषाय तस्मै"॥

इत्यादिवाग्भिः तम्अस्तोष्ट। तया स्तुत्या अतितुष्टः श्रीहरिः तस्मैं मनोऽभिलषितं वरं दत्वा स्वं लोकं भेजे।

ध्रुवः अपि तपोवनात् प्रत्यागत्य षट्त्रिंशत्सहस्रसमाः सर्वस्याः भुवः साम्राज्यसुखम् अनुभूय अन्ते तं ध्रुवलोकं प्रपेदे, यं सूर्यादयः ग्रहाः सप्तर्षिप्रमुखाः च तारकाः सततं प्रदक्षिणम् कुर्वन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च यत् तारकाद्वितयं ध्रुवतारायाः बहिः समन्ताद् भ्रमति, तत्तारकारूपेण स्वायम्भुवो मनुः तत्पत्नी शतरूपा च ध्रुवताराभूतस्य स्वपौत्रस्य सततं प्रदक्षिणां कुर्वाणौ सदा भ्रमतः। श्रीभगवदाश्रयानुभावः अलौकिकः खलु।

यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम्।?।
इत्याद्या आप्तजनोक्तिः अक्षरशः चरितार्था इति निश्चीयते।

इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd No. B. 7171

मधुरवाणी नियमावली

ये पंचनवीनग्राहकान् सम्पादयन्ति तेभ्यः विना मूल्यं मधुरवाणी पत्रिका प्रेष्यते ।

वर्षे यदा कदाचिदपि वा ग्राहकत्वं स्वीकर्तुं शक्यते । यदा ग्राहकता स्वीक्रियते तद्दिनादारभ्यैव वर्षपर्यन्तं द्वादशसञ्चिकाः प्रदीयन्ते ।

विना मूल्यं आदर्शसञ्चिका न प्रहीयते । अवलोकनार्थं सञ्चिका अपेक्षमाणैः अष्टाणक पोस्ट-टिकीट प्रेषणं कार्यम् ।

व्हि. पी. द्वारा पत्रिका नैव प्रेष्यते । प्रतिवर्षं वर्षारंभे मनिऑर्डर द्वारा एव शुल्कं प्रेषणीयम् ।

ग्राहकेतरेषामपि लेखाः सरसाश्चेत् प्रकाश्येरन् । असुवाच्याक्षराः नीरसाः दीर्घतराकाराः कठिणतमाश्च लेखा नैव अवसरमासादयेयुः । सरलतमानां लेखानां प्रथमप्राशस्त्यं प्रदीयते ।

BOOK-POST

To,
Shree

If addressee is not found
please return to sender.

Pandharinathacharya
Galagali

Editor Madhurwani

Madhurwani Office Gadag (Karnatak)

Printed at the New Gadag Printery Gadag. by P. S. Hombali
and Pablished by Pandharinathacharya Galagali at Gadag.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

24-9-59

श्री श्रीजगद्गुरु राघवेन्द्रमठाधीश श्री सुयमीन्द्रतीर्थ

स्वामिपादानां कृपापोषिता

मधुरवाणी

संस्कृत मास पत्रिका

शके १८८० विकारि संवत्सर आषाढाङ्कः १९५९

प्रधान संपादकाः

कविकुलतिलक विद्यावैभव वेदान्तशिरोमणि साहित्यालङ्कार

राजा एस्. गुरुराजाचार्याः

卐

संपादकाः

गलगलीत्युपाव्हाः पण्ढरीनाथाचार्याः

वार्षिक मूल्यं रु. ५-०० एकाङ्कस्य ०-५०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुरवाण्या मुख्य संचालकाः

श्री श्रीमद्राघवेन्द्र मठाधीश श्री सुयमींद्रतीर्थ स्वामिपादाः नंजनगूडु

श्री श्री विबुधेशतीर्थ स्वामिपादाः अधमारुमठ, उडुपी
श्री श्री मद् व्यासराज मठाधीश स्वामिपादाः
श्रीमन्तः पद्मनाभराव वैद्य महोदयाः

प्रतिवर्ष १०१ रू प्रदाः मधुरवाण्याः संरक्षकाः

श्री श्री प्रेजावर मठाधीश स्वामिपादाः
" भंडारगिरि मठाधीश स्वामिपादाः
" श्री भीमनकट्टी मठाधीश स्वामिपादाः
" श्री श्री स्वादीमठाधीश स्वामिपादाः
" कूडली शृंगेरी मठाधीश श्रीशंकराचार्य स्वामिपादाः

विषयानुक्रमणिका

	विषयाः	लेखकाः	पत्रसंख्या
१)	मंगलम्	संपादकः	१
२)	मासावतरणिका	,,	१
३)	गुरुवन्दनम्	,,	२
४)	तपःफलम्	श्री के. टी. पांडुरंगी M. A. प्राध्यापक कर्णाटक कॉलेज, धारवाड	२
५)	कुणालस्य करुणकथा	संपादकः	९
६)	वन्दे मातरम्	वेदप्रकाश विद्यावाचस्पतिः	१५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुरवाणी

२४ वर्षे) विकारि संवत्सरस्याषाढाङ्कः (अङ्कः ४

मङ्गलाचरणम्

" ग्रामेऽसौ मृग इत्यवेत्य मनुजाश्चीत्कुर्युरालोक्य मां
कान्तारेऽपि च हन्त वन्यपशवो नैवाद्रियेरंस्तथा ॥
बुध्द्वा मानुषमद्य कुत्र नु मया स्थातव्यमेवं " वृथा
चिन्तां सन्तनु मा नृसिंह हृदयारण्ये प्रभो तिष्ठ मे
दुष्टाः क्वापि नु किं हिरण्यकसमा नष्टावशिष्टाःक्षितौ
तत्प्रह्लादसमाश्च भक्तमणयःशिष्टा महिष्ठाः क्वचित् ॥
हन्तुं तान् स्वपदं च नेतुमितरान् श्रीमान्नृसिंहः स्थितः
शूर्पालीगलगल्यहोबलमुखक्षेत्रेषु भूयान्मुदे ॥

मासावतरणिका

मन्दंमन्दमसौ मधौ ननु परिस्पन्दन् सुगन्धं वहन्
स्यन्दत्पुष्पमरन्दबिन्दुमधुरो वायुर्जनान्नन्दयन्
आषाढेऽद्य सुफुल्लमल्लिमधुसम्पानातिरेकान्मदो-
न्मत्तश्चीत्कुरुते च वाति रभसात् स्पर्शाभिमर्शासहः ॥
सौगन्ध्यं त्वनुविन्द्य मन्दपवनश्चेन्दिन्दिराणां गणः
निष्यन्दन्मकरन्दमाप्य च पिकश्चूताङ्कुरानन्दितः
कामं ग्रीष्ममुं प्रशंसतु परं हा केकिनां शोकिनां
खिद्यच्चातकचेतसश्च सुमहद्दुःखं तु केनेक्ष्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुवन्दनम्

यस्मिन् संयमिशब्द एष निगृहीतात्मेन्द्रियत्वात्तथा ।
चेन्द्राख्या विबुधावलेः कृतसुधासंतर्पणादर्थवान् ॥
सार्थं तीर्थपदं च पावकतया शास्त्रोपदेशादिभिः ।
सोऽयं श्रीसुयमीन्द्रतीर्थयमिराडन्वर्थनामा मुदे ॥ १ ॥

स्वार्थं यस्तु विहाय संप्रयतते ह्यन्यार्थमेवानिशं ।
अर्थं गीतमनर्थमित्यपि सुधीसार्थे वितीर्यादरात् ॥
तस्मात्साधयते पुमर्थमपि यस्तत्प्रार्थनीयः सतां ।
सर्वश्री सुयमीन्द्रतीर्थसुयमी पायादपायात्स नः ॥ २ ॥

तपःफलम्

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः— आज्ञप्तोऽस्मि नभोवाणीश्रोतृवर्गेण यथा महाकविना कालिदासेन काव्यरूपेणोपनिबद्धस्य उमातपःफलोदयसन्दर्भस्य नभोवाणीरूपकमाधुनिककविना पाण्डुरङ्गि कृष्णेन विरचितं प्रसारयतु भवानिति । अहो कविकुलमौलिवन्द्यता वरकवेः कालिदासस्य ।

दासतां कालिदासस्य कवयः के न बिभ्रति ।
इदानीमपि तस्यार्थानुपजीवन्त्यमी यतः ॥ २ ॥

भवतु! आर्यामाहूय सङ्गीतोपक्रममादिशामि । अये पार्श्व एव तिष्ठति मे सहचरी नभोवाणीनिर्देशकाज्ञानुसारेण स्ववचनं यावन्मौनमातिष्ठन्ती । प्रिये! महानयं क्लेशस्ते यज्जिह्वा न चालनीयेति । अथ प्रवर्ततां सङ्गीतकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नटी— (निश्वस्य) आर्यमिश्र ! नेदं मौनं नभोवाणीनिर्देशकाज्ञानुसारेण द्विस्वरोत्पत्तिभयेन वा मया आस्थितम् । किन्तु दुहितुः उमायाः तपःक्लेशेन परितपन्त्या मेनाया दशां चिन्तयन्त्या मे वाणी न प्रसरति (विलोक्य) अये गौरीशिखरादागतया पार्वतीसख्या सह संलपन्ती मेना इत एवागच्छति । गच्छावस्तावत् । (निष्क्रमतः)

(ततः प्रविशति पार्वतीसख्या अनुगम्यमाना मेना)

मेना— कथय कथय कथं मे वत्सा उपात्ततपस्विनीवेश दृश्यत इति ।

सखी— अम्ब! गिरीशसक्तमानसया तया हारं विमुच्य बालारुणपिङ्गलं वल्कलं धृतम् । जटाभिश्च तदीयं आननं मधुरं दृश्यते । त्रिगुणां मौञ्जीं बिभर्ति । कुशाङ्कुरादानपरिक्षताङ्गुलिः करः अक्षसूत्रप्रणयी कृतः ।

मेना— धावति मे मनो वत्साया उमाया मुखं द्रष्टुम् । कथय तावदस्या मुनिव्रतचर्य्याम् ।

सखी— अम्ब शृणु तावत् । महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि दूयमाना सा बाहुलतोपधायिनी भूत्वा स्थण्डिल एव शेते । नियमस्थया तया विलासचेष्टितं विलोलदृष्टिश्च लतासु हरिणाङ्गनासु च निक्षिप्ते । घटस्तनप्रस्रवणैः स्वयमेव वृक्षकान् वर्धयति । अरण्यबीजाञ्जलिलालिता हरिणाः तस्यां दृढं विश्वसन्ति । विरोधिसत्त्वैर्मत्सर उज्झितः । द्रुमैः अभीष्टप्रसवेण अतिथयः अर्च्यन्ते । ऋषयोऽपि तां दिदृक्षवोऽभ्युपगच्छन्ति । (निष्क्रमतः)

(ततः प्रविशति गौरीशिखरे चतुरग्निमध्यगा सूर्यं पश्यन्ती उमा पार्श्वस्थिता सखी च)

सखी— अहो अनितरसाधारणं चेतसः स्थैर्य्यं मे
सख्यः पर्वतराजपुत्र्याः । तथा हि
शुचौ चतुर्णां ज्वलतां हविर्भुजाम्
शुचिस्मिता मध्यगता सुमध्यमा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विजित्य नेत्रप्रतिघातिनीं प्रभाम्
अनन्यदृष्टिस्सवितारमीक्षते ॥ ३ ॥

अयाचितोपस्थितमम्बु केवलम्
रसात्मकस्योडुपतेश्च रश्मयः ॥
भवन्ति चास्याः किल पारणाविधिः
न वृक्षवृत्तिव्यतिरिक्तधनासः ॥ ४ ॥

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः
वलीषु चास्या स्खलिता विशन्ति वै
चिरेण नाभिं प्रथमोदबिन्दवः ॥ ५ ॥

मृणालिकापेलवमेवमादिभिः
व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ॥
तपः शरीरैः कठिनैरुपार्जितम् ।
तपस्विनां दूरमधः करोति सा ॥ ६ ॥

(विलोक्य) अये परिसमाप्तसूर्योपस्थाना मे प्रियसखी । उपसर्पामि तावत् (उपसर्पति)

उमा– हला अपि सन्नद्धपारणसम्भारासि ?

सखी– सखि अम्बुपारणायास्तव किं पारणसम्भारचिन्तया ?

उमा– ननु पारणार्थी कोऽप्यतिथिः समागच्छेत् ।

सखी– सखि समृद्धफलमूलमिदं तपोवनम् (आकर्ण्य) अये पदशब्द इव श्रूयते (विलोक्य) सखि अजिनाषाढधरः शरीरबद्धः प्रथमाश्रम इव कश्चिदभ्युपैति दिष्ट्या चिरात् प्राप्तातिथयो वयं वर्धामहे ।

(ततः प्रविशति ब्रह्मचारी)

उमा–(उत्थाय) स्वागतं तपोधनाय (स्वगतम्) कथं दृष्टमात्र एव एतस्मिन् चेतो मे बहुमानमावहति । दृष्टिश्च रज्यति (प्रकाशम्) हला अर्घोपकरणमानय (अर्घ्यमर्पयति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मचारी- आर्ये

अपि क्रियार्थं सुलभं समित्कुशम्
जलान्यपि स्नानविधिक्षमाणि ते ॥
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥ ७ ॥

सखी- भवादृशामनुग्रहेण निष्प्रत्यूहं सख्यास्तपः ।

ब्रह्मचारी- आर्ये ! प्रयुक्तसत्कारविशेषं न मां परं सम्प्रतिपत्तुमर्हसि । 'सङ्गतं सातपदीनमि'ति मनीषिभिरुच्यते । अतो द्विजातिभावचापलादहं किञ्चित् प्रष्टुमनाः। रहस्यं न चेत् प्रतिवक्तुमर्हसि ।

उमा- (सखीमुखं पश्यति)

सखी- आर्य अनतिक्रान्ततपोवनमर्यादं बाढं प्रष्टुमर्हसि ।

ब्रह्मचारी- आर्ये

कुले प्रसूतिः प्रथमस्य वेधसः
त्रिलोकसौन्दर्यमिवोदितं वपुः ॥
अमृग्यमैश्वर्यसुखं नवं वयः
तपःफलं स्यात् किमतः परं वद ॥ ८ ॥

सखी- आर्य ! सत्यमुक्तं भवता । एवमप्यस्ति तपसः कारणं मे सख्याः ।

ब्रह्मचारी- किं नाम दुःसहमनिष्टं स्यात् ? अथ पितुर्गेहे विमानना ? आहोस्वित् पराभिमर्शः ? किमिति वार्धकशोभि वल्कलं यौवने धृतमिति बहु चिन्तयन्नपि नाहं तपसो निमित्तं पश्यामि ।

अथ उपयन्तारं वरं प्रार्थयसे तर्हि अलं समाधिना । 'न रत्नमन्विष्यति मृग्यते हि तत्' ।

उमा- (निश्वसिति)

ब्रह्मचारी- निवेदितं किल निश्वसितेन । ईदृशस्य रूपराशेः प्रार्थयितव्य एव न दृश्यते । प्रार्थितस्सन् कथं दुर्लभो भविष्यति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सखी— नाद्ययावत् प्रियसख्युः तपसः फलोदय इति पश्यत्येव भवान् ।

ब्रह्मचारी— अस्याः प्रियः सौभाग्यमदेन वञ्चित इति मन्ये यदद्ययावदात्मनो वक्त्रमस्याः चक्षुषो लक्ष्यं न करोति । कियच्चिरं वा एषा श्राम्यति । अस्ति मे पूर्वाश्रमसञ्चितं तपः । तस्यार्धभागेन अस्याः काङ्क्षितं वरं लम्भयितुमिच्छामि । कोऽयं सचेता यस्य मनः अतिमात्रकर्शितामिमां दृष्ट्वा न दूयते ?

उमा— (अपवार्य) हला स्पृशति मे हृदयं वार्णेनो वचनम् । शालीनतया न वक्तुं प्रभवामि । त्वमेव तावत् भण ।

सखी— आर्ये ! महेन्द्रप्रभृतीन् चतुर्दिगीशानवमत्य सखी मे पिनाकपाणिं पतिमिच्छति ।

ब्रह्मचारी— अलं परिहासेन । इङ्गितं पृच्छामि ।

उमा— इङ्गितज्ञा मे सखी । तप इदं चन्द्रशेखरावाप्तिसाधनम् । न खलु मनोरथानामगतिर्नाम ।

सखी— पुरा किल पुरारिणा असह्यहुङ्कारेण निवर्तितः पुष्पधन्वनः शिलीमुखः इमां हृद्यक्षिणोत् । तदाप्रभृति उन्मदना एषा तुषारसंघातशिलातलेष्वपि निर्वृतिं न लभते स्म । त्रिभागशेषासु निशासु नेत्रे निमील्य 'नीलकण्ठ क्व व्रजसी' ति असत्यकण्ठार्पितबाहुबन्धना व्यबुध्यत । स्वहस्तोल्लिखितः शशिमौलिः 'सर्वगतस्त्वं भावस्थमिमं जनं कथं न वेत्सि' इति रहसि अनया उपालभ्यत । जगत्पतेस्तस्याधिगमेऽन्यमुपायमलभन्ती तपसे तपोवनमिदं प्रपन्ना । किन्तु अस्या मनोरथो नाद्ययावत् प्ररोहाभिमुखः । न जाने कदा वा सः तपःकृशां मे सखीमभ्युपपत्स्यत इति ।

ब्रह्मचारी— आर्ये ! विदितो मे महेश्वरः । अमङ्गलाभ्यासरतेस्तस्यानुवृत्तिं नाहमनुमन्तुमुत्सहे । अहिकङ्कणेन शम्भोः करेण कथं वा ते धृतविवाहकौतुकस्य करस्यावलम्बनं सहिष्यते । कथं वा कलहंसलक्षणं वधूदुकूलं शोणितबिन्दुवर्षि गजाजिनञ्च योगमर्हतः । अलक्तकाङ्कानि ते पदानि परेतभूमिषु को वा अनुमन्येत । हरिचन्दनास्पदे ते स्तनद्वये चिताभस्म पदं करिष्यतीत्यतः परं किं नाम अनौचित्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मावहेत् । परिणीतया त्वया करीन्द्रारोहयोग्यया वृद्धोक्षमधिष्ठितं दृष्ट्वा पुरजनः स्मेर-मुखो भविष्यति किल । किं बहुना

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु
वरेषु यद् बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥ ९ ॥

अलं श्मशानशूलस्य यूपसत्क्रियाकरणेन

उमा— आर्य! न भवान् परमार्थतो महेश्वरं वेद । यदेवं महात्मनस्तस्य चरितं द्वेष्टि ।

अकिञ्चनःसन् प्रभवः स सम्पदाम्
त्रिलोकनाथःपितृसद्मगोचरः ॥
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥ १० ॥

अथवा अलं विवादेन । मम पुनर्भावैकरसमत्रमनः । सखि निवार्यतामेष वटुर्यो महतोऽपभाषते । अथवा अहमेव इतो गमिष्यामि (गन्तुमिच्छति)

ब्रह्मचारी— (स्वरूपमास्थाय) प्रिये पर्वतराजपुत्रि उदितं ते तपःफलेन (इति समालम्बते)

सखी— अये कथं ! नीलकण्ठ एष नैष्ठिकसुन्दरः । दिष्ट्या सम्पूर्णो मे सख्या मनोरथः । हन्त रमणीया इयं दशा लज्जापिताया मे सख्याः । तथाहि

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिः
निक्षेपणाय पदमुद्धतमुद्वहन्ती ॥
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ११ ॥

ब्रह्मचारी— (पार्वतींसमालम्ब्य)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः ।
क्रीतस्तपोभिरयि पार्वति चन्द्रमौलिः ॥
सद्यःक्लमं नियमजं जहि कोमलाङ्गि ।
क्लेशः फलेन हि पुनर्नवतां विधत्ताम् ॥ ९२ ॥

प्रिये किं ते भूयः प्रियमुपकरोमि

उमा— किमतःपरं प्रियमस्ति ।

या मे प्रीतिर्विरूपाक्ष त्वदनुध्यानसम्भवा ।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम् ॥ १३ ॥

तथापीदमस्तु

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ॥
दोषाः प्रयान्तु शांतिं सर्वत्र सुखी भवतु लोकः ॥

(निष्क्रान्तास्सर्वे)

इति श्रीमहाकविकालिदासविरचितकुमारसम्भवपञ्चमसर्गस्य नभोवाणीरूपक-परिवर्तनं पाण्डुरङ्गि कृष्णेन विन्यस्तं समाप्तम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुणालस्य करुणकथा

भारतवर्षस्य सुप्रसिद्धचक्रवर्ती सम्राडशोकः प्रथमपत्न्या मरणानन्तरं पुनः तिष्यरक्षितानाम्नीं कन्यां परिणिनाय। तिष्यरक्षिता न उच्चकुलप्रसूता किन्तु स्फुरद्रूपरञ्जिनी कलभाषिणी च आसीत्। नवतारुण्यपरिपुष्टेषु तस्या अङ्गाङ्गेषु उद्रिच्यमानं मादकं मोदकं मोहकं चं सौन्दर्यं दृष्ट्वा मुग्धः अशोकसार्वभौमः तस्याः कौलीन्यं अविचार्यैव तामुवाह।

कलिङ्गयुद्धसमाप्त्यनन्तरं अशोकः बौद्धधर्मानुरागी बभूव। बौद्धधर्मप्रसारार्थं च सः यदा तदा राजधानीं परित्यज्य देशान्तरं गच्छति स्म। तदवसरे राज्यशासनभारं तस्य प्रेयसी तिष्यरक्षिता एव राजाज्ञया निर्वहति स्म। एवं क्रमेण तस्या अधिकारः दर्पः शासनशक्तिः राजवशीकरणयुक्तिश्च दिने दिने समेधमाना एवासन्।

अशोकस्य प्रथमभार्यया एकः पुत्र आसीत्। विश्वाकर्षकं तस्य नयनसौन्दर्यं निरीक्ष्य कुणालनामकं चारुचक्षुषं कमपि हैमाचलपक्षिविशेषं संस्मरन् महाराजः कुणाल इत्येव तस्य नाम चकार। प्राप्ते तु यौवने कुणालस्य नयनेन्दीवरद्वन्द्वे लोकोत्तरमेव सौन्दर्यं नरीनृत्यति स्म। तस्य एकस्मिन् अक्षिपरिस्पन्दने सहस्रमरविन्दानि समुन्मीलितानि भवन्ति स्म। तस्य चक्षुश्चारुतां पश्यन्तीनां रमणीनां सतीनामपि चित्तं विचित्रमेव विकारं इदंप्रथमतया अनुभवति स्म।

तरुणे वयसि वर्तमाना सम्राज्ञी तिष्यरक्षिता अपि कुणालस्य रमणीयतैकमन्दिरं अतिसुन्दरं नेत्रद्वन्द्वं दृष्ट्वा मुग्धा बभूव। रागरसोन्मत्तचित्ता प्रेमान्धा सा राजभामिनी स्वमातृमर्यादामप्यतिक्रम्य तस्य समीपे प्रणयभिक्षां ययाचे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधुस्वभावः सच्छीलशाली सद्गुणमाली च कुणालः प्रथमतः स्वमातुः अमुं प्रणयालापं श्रुत्वा स्वकर्णयोरेव न व्यश्वसत् । परं तस्याः विलासालसं रागलालसं च चञ्चलं नयनाञ्चलं दृष्ट्वा कामान्धतां निश्चित्य निर्भयं निर्मायं च निर्भर्त्सयामास राजरमणीम् । "नाहं मातरि श्वा भूत्वा नित्यनरकमनुभविष्यामि । मातृस्थाने वर्तमाना त्वं मम सर्वदा पूजनीया वन्दनीया माननीया चासि । देवदत्तेन तव अनुपमसौन्दर्येण मम पितरं प्रीणय, आशीर्भिः मामनुग्रहाण च । इतःपरं यदि मम पुरस्तात् प्रणयलीलाप्रस्तावं करिष्यसि तदा तव मम च सर्वनाश एव भविता" इति विभीषिकाप्रदर्शनपूर्वकं उज्जागरयामास ।

परं तस्य चञ्चलनयनाञ्चलस्य विद्युद्विलासान् रुचिरप्रेक्षितानि च विलोक्य मुग्धायाः विदग्धायाः रसिकराज्ञ्याः विलोलं मनः कुणालस्य रुक्षोपदेशं नीतिपाठं वा श्रोतुं नैव सिद्धमासीत् । यौवनं धनसंपत्तिः प्रभुत्वमविवेकितेति दुर्गुणचतुष्टयमपि तस्यां मिलितमासीत् । सामदानादिचतुर्विधोपायानपि सा तं कुणालम् आकृष्टुं अनुकूलयितुं प्रायूयुजत् । परं नीतिनिष्ठः न्यायनिष्ठुरश्च राजकुमारः अर्जन इव ऊर्वश्याः प्रणययाचनां तिरश्चकार सधैर्यं सावहेलनं च ।

तदा विद्धेव खण्डितेव पदाहतेव च क्रुद्धा व्यालीव फूत्कुर्वन्ती कालीव धिक्कुर्वन्ती तिष्यरक्षिता अस्य प्रणयभङ्गस्य महावमानस्य प्रतीकारं कर्तुं निश्चिकाय । तस्याः स्नेहःसन्तापात्मना प्रणयदाहश्च प्रतीकारप्रलयानलात्मना क्षणादेव पर्यवर्तत ।

सम्राडशोकस्य सशरीर इव धर्मे प्रजानुरागभाजने राजकुमारे कुणाले अन्यादृशमेव प्रेम आसीत्। अतः कथं वा तस्मिन् प्रतिकर्तव्यमिति महाराज्ञी अहर्निशं व्यचिन्तयत् ।

तदा तक्षशिलायां महदेव राजकीयमान्दोलनं उद्बुद्धम् । सामन्तराजाः तत्परिसरवर्तिनः सर्वेऽपि तक्षशिलामाक्रम्य स्वसत्तां स्थापयितुमुद्यता इति वार्ता राजधानीमागता । तदवसरे गृहिणी सचिवः तिष्यर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षिता तक्षशिलाकोलाहलमुपशामयितुं, तत्र च यथापूर्वं स्वसत्तां स्थिरीकर्तुं च वीरवरः कुणाल एव योग्य इति राज्ञे सूचितवती । वार्धक्ये राजकुमारं इयद्दूरदेशान्तरं तत्रापि प्रबलपरिपन्थिभिः सह युद्धाय प्रेषयितुं राज्ञः इच्छैव नासीत् । परं स्वमात्रतः एव चतुरमतिः मधुरभाषिणी च तिष्यरक्षिता स्वस्य कान्तासम्मितोपदेशप्रभावेन तं वशीकृत्य तक्षशिलागमनाय कुणालस्य राजाज्ञां दापयामास ।

तत्र गमनानन्तरं प्रचण्डपराक्रमः कुणालः सर्वानपि वैरिराजान् पराजित्य स्वाधिकारं स्थिरीकृत्य शांतिं ररक्ष, सुव्यवस्थां आकलयामास-प्रजासन्ततिमनुरञ्जयामास च ।

इत एकदा सम्राडशोकस्य उदरशूलं सहसा उदबुद्धयत । सुश्रुत-विश्रुतैः वाग्भटप्रतिभटैः नैकैरेव राजवैद्यैः चिकित्सितस्यापि तद्रोगस्य उल्बणता दिने दिने अभ्यवर्धतैव । "रोगोऽयं दुष्प्रतीकार्य इव मे प्रतिभाति । राजकुमारमानेतुं कमपि दूतं प्रेषयेति" राजा प्रेयसीमाज्ञापयामास । तस्य पुरः ओमित्युक्त्वापि सा न कमपि प्रेषयामास ।

सर्वत्राप्यप्रतिहतबुद्धिः सा मेधाविनी मानिनीमणिः नवमन्वन्तरधन्वन्तरिभिरिव वैद्यविद्याविशारदैः शताधिकभिषग्वरैः अशक्यमिति परित्यक्तस्यापि रोगस्य उपशमनाय स्वयं उपायान्वेषणं प्रारब्धवती । सहस्राधिकरीतिभिः संशोधनानि विधाय तद्रोगनिदानं आविष्कर्तुं भगीरथप्रयत्नमेवाकरोत् सा अबला प्रबला राजरमणी ।

राज्ये तत्र तत्र गुप्तचरान् संप्रेष्य ईदृशरोगेण देशे किं कोऽपि वा नरः आक्रान्तः विद्यते ? इति गवेषयामास । कस्मिन्नपि ग्रामे कश्चन अजापालः तथाविधेनैव उदरशूलेन अभिभूतः दुःख्यति स्म ।

राजमहिषी तिष्यरक्षिता तं अजापालं स्वगृहं आनाययामास । अत्युग्रतरेण औदरिकशूलेन बलवदभिक्रान्तः सः मेषपालः प्राणान्तिकवेदनां जीवद्यमयातनां च सोढुं अशक्नुवानः घोरं आक्रन्दति स्म । आत्म-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हत्यां कर्तुं च उत्सुकते स्म च । तिष्यरक्षिता च तस्य भावं तत्परिवारस्य च द्रव्याभावं विज्ञाय तद्बन्धुभ्यः लक्षाधिकरूप्यकानि प्रदाय तं व्यक्रीणात् । ततः स्वयं मरणोत्सुकस्य तस्य उदरं विदारयामास वैद्यवर साहाय्येन । तदुदरे आन्त्रवल्यां कोऽपि कीटः कुक्षिं कर्तयन्नदृश्यत । तं मारयितुं च कट्वम्ललवणरसान् परिषिषेच । परं नासौ कृमिः मृतः । परं पुष्ट एवाभूत् । एवं शताधिकोपायप्रयोगानन्तरं पलाण्डुरसं प्रयोक्तुं तस्या मतिरुदैत् ।

यदा वैद्याः तस्याः सूचनानुसारं पलांडुं समीपे एव अवहृत्य रसार्थं निष्पेषयितुं उपाक्रमन्त तदा तद्गन्धाद्दूरादेव कृमिः मरणमवाप । उदरशूलकारणीभूतकृमेः विनाशोपायं सम्यगवबुध्य प्रयोगपूर्वकं साक्षात्कृत्य च सा परमसन्तोषमधिजगाम ।

राज्ञः समीपमुपगत्य सा तस्य रोगमुपशमयिष्यामि इति प्रतिज्ञातवती । तथा पलाण्डुरसं पाययित्वा धन्वन्तरिप्रतिमैः भिषग्भिरपि दुश्चिकित्स्यं अत्युल्बणं रोगं एकस्मिन्नेव दिने दूरीकृत्य पतिं उल्लाघं उल्लसितं च चकार । चक्रवर्ती तु तस्यां लोकोत्तरां प्रतिभां पतिभक्तिं संशोधकबुद्धितीक्ष्णतां च दृष्ट्वा अतितरां मुग्धः प्रणयलुब्धश्च भूत्वा तस्यै सर्वाधिकारानपि प्रददौ ।

सा च कार्यसाधुः सन्धिसाधिका चतुरधीः चार्वङ्गी तस्य च राजदत्तस्य सर्वाधिकारस्य स्वोद्देशसाधनाय सत्वरमुपयोगः कार्य इति निश्चिकाय

एकस्मिन्दिने तक्षशिलायां स्थापितसाम्राज्यशान्तये पितृभक्ताय कुणालाय सार्वभौमस्य नाम्ना पत्रमेखं विलिख्य स्वराज्याद् बहिर्गन्तुं आदिदेश । तथा मन्त्रिभ्योपि कुणालस्य अक्षिणी उत्पाटयित्वा राज्यान्निष्कासयितुं आदेशपत्रं व्यलिखत् । सार्वभौमं प्रतारयित्वा, सुखसुप्तस्य तस्य कराङ्गुलीतः राजमुद्रिकां आहृत्य तन्नामाङ्कितं विधाय पत्रं प्रेषयामास शीघ्रगामि दूतद्वारा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुणालः तन्मन्त्रिणश्च दारुणममुं राजादेशं श्रुत्वा वज्राहता इव क्षणं दिग्भ्रान्ता एव बभूवुः। "नैषा राजाज्ञा। कस्यापि दुर्बुद्धेरेव हस्त-लाघवविलसितमिदम्। नैतन्निदेशमनुपालयिष्यामो वयमिति" स्पष्टमेव आवेदयायासुः मंत्रिणः प्रजाश्च।

परं महात्मा कुणालः तत्पत्राङ्कितां राजमुद्रिकां प्रदर्श्य "नूनमियं राजाज्ञा एव। पितुरादेशं विरुद्ध्य मया, राजाज्ञामुल्लंघ्य च भवद्भिः न प्रतिवक्तव्यं नापि प्रतिकर्तव्यम्। अतः सत्वरमेव अनुष्ठीयतां महा-राजस्य शासनमि"त्युक्त्वा राज्यं परितत्याज।

परं साधुशिरोमणेः साक्षान्मन्मथप्रतिमस्य साकारस्येव सौन्दर्यस्य तस्य राजकुमारस्य अप्रतिद्वन्द्वं नयनेन्दीवरं उत्कर्तयितुं न कोऽपि चण्डालः पुरोऽभवत्। तदा पितुर्वचसि निरतिशयामेव श्रद्धाबुद्धिमादधानः राज-पुत्रः एकस्मिन्दिने तप्तायःशलाकिकया स्वयं व्याविध्य जगदाकर्षकं नीलोत्पलाभं स्वनयनयुगलं विध्वंसयामास। ततश्च तन्मूलिकां मरणा-न्तिकवेदनां सोढुमशक्नुवानः चीत्कुर्वन् क्रन्दन् विलपन् विलुठन्नेव वनेषु इतस्तत आहिण्डत राज्यसीमानं सुदूरमेव परित्यज्य।

कालान्तरेण किञ्चिदिव मन्दीभूतायां नेत्रवेदनायां वनाद्वनं परिभ्रमतः अन्धस्य तस्य राजकुमारस्य मनसि कदाचित् कोऽपि विचार उदभवत्। "अहो को नाम अपराधः मया कृतः येन मयि जन्मनः प्रभृति नितरां स्निह्यन्नपि महाराजः निरनुक्रोशतया एवं दारुणतरमन्वशासीत्? बहिश्चरप्राणाः खलु पुत्रा नाम मनुष्याणां। तत्रापि सर्वभूतहिताकांक्षी प्रियदर्शी मम पिता निरपराधिनं माम् कथमेवं शिक्षयेत्। को वा स्यान्मदीयोऽपराधः? यदिस्यात् कोऽपि तदा तद्ज्ञात्वा पितुःपादयोः पतित्वा क्षमा प्रार्थनीया" इति विचार्य कथंचित् राजधानीमुपागच्छत्।

एकदा सायंकाले अश्वमारुह्य नगरे संचरन् महाराजः राजवीथ्यां गात्रहीनभिक्षुकवृन्दे उपविश्य सकरुणं गायतः कस्यापि अन्धस्य दीनस्वरं दूरादेव अश्रौषीत्। तस्य करुणाक्रन्दनस्य गीतगुप्तां दुःखदारुणतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञाय अश्वादवप्लुत्य तस्य भिक्षुकस्य समीपमुपासदत् महाराजः। दुःखावेगकम्पमानः सः अन्धस्य स्वरोपि महाराजस्य परिचितपूर्व इव अलक्ष्यत। तस्य अन्धगन्धर्वस्य समन्तात् सहस्राधिका जनाः शिलावत्स्थित्वा करुणालहरीषु दोदुल्यमानमानसाः अश्रु मुञ्चन्ति स्म। महाराजः तं जनस्तोमं कथंचिदुल्लंघ्य यावत्समीपमुपागत्य अवालूलुकत् तावदेव 'हा हन्त मम प्रियपुत्रः कुणाल' इति उच्चरन्नेव मुमूर्छ पपात अन्धपुत्रस्य अङ्के एव।

शैत्योपचारैः उद्बुद्धः महाराजः कुणालं राजमन्दिरमानीय सर्वमपि वृत्तान्तं पृष्ट्वा अवजगाम। अन्धमपि तं सुकुमारं कुमारं मुहुर्मुहुः अलिलिंग, पुनःपुनः चुचुम्ब, भूयोभूयः तस्य सर्वाङ्गं पराममर्श, शिरसि आजिघ्रपत्,उरसि गाढमाश्लिषत् उत्सङ्गमारोपयामास,पृष्ठमास्फालयास, तस्य कान्तिशून्ये नयने संस्पृश्य संस्पृश्य हा हन्त हन्तेति आचुक्रोश च। तिष्यरक्षिता च तद्दिन एव जीवन्ती एव सदेहं दाहिता दग्धकाष्ठवत्।

परेद्युः राजगुरुः राजसभायां समेषामपि सभिकानां करे एकैक चषकं प्रदाय अन्धकुणालंप्रति स्वकरुणकथां आख्यातुं आदिशत्। न्यायासनस्य समीप एव स्थित्वा कुणालः सर्वेषामपि हृदयविदारिणीं दारुणां स्वकथां दीनस्वरेण श्रावयामास तां च ग्रावद्राविकां वज्रविलापिकां करुणगीतिकां श्रुत्वा सभ्यानां नयनेभ्यः दुःखाश्रु धाराकारं प्रावहत्। प्रत्येकस्यापि करदत्तः चषकः बाष्पवारिणा परिपूरित आसीत्।

ततः राजगुरुः समंतभद्रः तान् सर्वानपि बाष्पपूर्णचषकान् समानीय तज्जलेनैव राजकुमारस्य अक्षियुगलं प्रक्षालयामास। तत्क्षण एव राजपुत्रस्य नष्टनेत्रयोः कान्तिः काचिद् विलक्षणैव पर्यस्फुरत्। यथापूर्वं तस्य त्रिभुवसौन्दर्यसारायमाणे लोचने विद्युद्विलासः जगदानन्दसन्दायकचन्द्रिका च नर्तितुमुपाक्रमत। चिरकालानन्तरं लब्धनेत्रः कुणालः स्नेहातुरं प्रजाजनं वात्सल्यविद्रुतं च पितरं उपोषिताभ्यामिव लोचनाभ्यां आचूलमूलं ददर्श आनन्देन ननर्त च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दे मातरम्

वर्णा नितान्तसाधारणाः, अजानद्भिरपि ये जायन्ते प्रयुज्यमानाः, परं न भवन्ति चमत्कारकारणानि,—आम् त एव विशेषविन्यासगुम्फिता विचित्रपरम्परापरीता अद्भुतां भावलहरीमुद्भावयन्ति। ध्वनितमात्रास्ते गगनगामिनाऽभ्रभेदिना ध्वनिना विश्वमपि प्रतिध्वनयन्ति। श्रुत्वा रोमाञ्चितो जायते कायः, हृदयमपि गद्गदायते, स्वर्गीयानन्दसन्दोहं विन्दते तदा मानवः। सर्वांशपूर्णा एषैवावस्था तदा मूर्तिमती भूत्वा चित्रितेव लक्ष्यते; यदाऽसंख्यजनसमुदायाद्घोषितो हृत्तलस्पर्शी मातृजयनाद आकाश उत्तिष्ठति। केन वास्तविकेन भारतीयेन न कर्णगोचरीकृतं स्याद् "वन्देमातरम्", निशम्य च न पुलकितकायेन भूतं स्यात् ?

आस्तां तावद्दूरगमनम्-भारतीयक्रान्तिकारिणां रक्तरञ्जितेतिहासः प्रतिपृष्ठमुच्चैः सूचयति-यथा भारततरुणाः प्राणपणैरपि 'वन्देमातरम्-प्रणयपालनम्' अकुर्वन्। 'हथकड़ी-बेड़ी' निगड़ितास्ताड़नदमनदानवचक्रकालेऽपि प्रतिकशाघातं 'वन्देमातरम् घोषं घोषं प्राणानपि तत्यजुः। कारागारस्यामानुषिकी यातना तु शक्येत स्वीकर्त्तुम्; न परं हृद्गतं 'वन्देमातरम्' पार्येत बहिष्कर्तुम्।

अस्यैतावन्महत्त्वमेवास्मान् विचारयितुं प्रवर्त्तयति; यदत्र किमु भावनामात्रमेवाऽऽवेशं भावयति; आहोस्विद् अन्तःसारविन्यासोऽपि कश्चनात्र गम्भीरभावसुरभिं सृजति ?

इदं 'वन्देमातरम्' अस्माकं राष्ट्रियगीतम्, राष्ट्रियजयनादश्च। प्रतिराष्ट्रस्य भवति स्वकं राष्ट्रियगीतम्; यद्गायन्ति ते समादरेण। निजं जयनादञ्चापि मधुरतारस्वरेणोद्घोषयन्ति। तयोः सादरमुच्चारणे आत्मगौरवमिव ते प्रकटयन्ति।

यथा ध्वजो राष्ट्रस्य मूकः किन्तु स्पन्दमानः प्रतिनिधिः, तथैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रियगीतं जयनादश्चापि राष्ट्रगौरवस्य शाब्दिकः सङ्केतः। अस्याऽऽदरे राष्ट्रस्याऽऽदरः, अस्यैव गौरवे राष्ट्रस्य गौरवम्।

ध्वज इव राष्ट्रियगीतमपि राष्ट्रभावनानां नवनीतम् (सारः), राष्ट्रियोद्गाराणां चित्रमिव। यस्मिन् राष्ट्रे यादृशी भाषा, यादृशी भावना, यादृशञ्च मतं सञ्चरति; तेषां प्रतिबिम्बमिव प्रतिफलति राष्ट्रियगीते। यथाऽऽङ्गलदेशीया राजानमेव सर्वतोभावेनोत्कृष्टं मन्यन्ते। अतः स्वराष्ट्रियगीते "God Save The King" इति राज्ञः कल्याणं कामयन्ते। यथायथमन्यत्रापि। एवं हि भारतराष्ट्रियगीते तु मातुरेव महिमा।

भारतभूमिं मातरं मत्वा तस्या वास्तविकसत्तागौरवं पर्यचिनवाम भारतीयसंस्कृतौ मातुः सत्ता महामान्या पावना च। अत एव तद्रूपेण मान्यान्तरमप्युपमातुं नैसर्गिकमेव। अन्यदपि, मातुर्भूमेश्च परस्परसम्बन्धोऽप्यद्वितीय एव; तञ्च "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति प्रबलं प्रमाणयति।

राष्ट्रशक्तिप्रतीकेऽस्मिन्गीते राष्ट्रस्याऽऽधारोऽस्मत्संघर्षस्य लक्ष्यम्' मातृरूपा भारतभूमिराम्नाता। अस्य ध्येयस्य निर्वाचन एव सकलचमत्कारः; यतो हि राष्ट्रियतायाः सत्यं वैदिकं स्वरूपं नैकव्यक्तिसमाश्रितम्। अतो वेदं व्याख्यायता 'शतपथेन' एककारिणं हस्तैकगतसर्वाधिकारं राजानं निन्दता जनतन्त्रराज्यं प्रशंसितम्।

इतिहासोऽपि नः स्कन्धग्राहं सावधानयति; यद्यावद् राज्यसञ्चालनसूत्रं प्रजाजनस्य प्रतिनिधिमण्डलस्य हस्तगतमासीत्; तावद् राष्ट्रं शान्तिमयं समृद्धिशालि चावर्तिष्ट। किन्त्वेकशासकस्य हस्तगमनादेव शोषकशोषितवैषम्यवाद उदतिष्ठत्। किमधिकम्! सकलसाम्राज्यमपि क्रीडनकमिवैकव्यक्तये सञ्चलति स्म। सर्वाणि युद्धान्यप्येकस्मै क्रियन्ते स्म। एवं सति दैववशाद्यदाऽसावाधार एव नाभूत्; तदेदं सर्वं साम्राज्यं युद्धञ्चापि निष्फलं निरपद्यत। हन्त! राष्ट्रशक्तेर्विडम्बना!!!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनङ्गपालस्य सेना महमूदगजनवीतः पराजयं कथं प्राप, किमत एव; यत् [illegible]सत्रस्याऽऽराध्यदेवोऽनङ्गपालो हस्तिप्रधावनात् तत्रोपस्थातुं नाश[illegible] राणासाङ्गस्य सैनिका बाबरं पराजयमाना अप्यत एव न निर्जा[illegible]षणां कर्तुमशक्नुवन्; यतो हि समरसूत्रधारो यदर्थं युद्ध्यते स्म; [illegible] राणासाङ्गः शरविशीर्णाङ्गः प्रासादे प्रापित आसीत् ।

अतः पराजयप्रापयित्रीः स्वकीया इमाः स्खलतीर्विमृश्य विजेतृजातीनां स्वदेशार्थं योद्धॄणां युरोपीयाणां, धर्मार्थञ्च मुमूर्षूणां यवनानां विजयात् चेतनीयमस्माभिः । कियद् गौरवास्पदमिदम् यदस्मद्राष्ट्रिया प्रतीके गीततरङ्गे भौतिकवादधर्मयोः समन्वयः । भूमे राष्ट्राधारतभौतिकवादः, तस्यां मातुरभिमानो धर्मवादः, अतः स्वभूमिं मातरं मत्वा तदभिलक्ष्य च सर्वं व्यवसनीयम् ।

पूर्वकृतो नः स्वतन्त्रतासंग्रामो न गान्धये, नापि सुभाषाय, अपि तु जनन्यै जन्मभूम्यै । एष दिव्यसन्देश एतस्य 'वन्दे मातरम्' गीतस्य; योऽस्मान् प्रतिपदं राष्ट्रकर्त्तव्यविमर्शे सविवेकं प्रदीप इव पन्थानं प्रदर्शयति। अद्वितीयमेतद् 'वन्देमातरम्' एवास्मत्सुराज्यसंग्रामसोपाने साधनम्, अस्यैव सन्तानततिरार्यावर्त्तसन्ततेर्वास्तवस्वतन्त्रतां प्रापयिष्यतीति सम्प्रधार्यम् ।

— श्री० वेदप्रकाशो विद्यावाचस्पतिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd No. B. 7171

मधुरवाणी नियमावली

ये पंचनवीनग्राहकान् सम्पादयन्ति तेभ्यः विना मूल्यं मधुरवाणी पत्रिका प्रेष्यते ।

वर्षे यदा कदाचिदपि वा ग्राहकत्वं स्वीकर्तुं शक्यते । यदा ग्राहकता स्वीक्रियते तद्दिनादारभ्यैव वर्षपर्यन्तं द्वादशसञ्चिकाः प्रदीयन्ते ।

विना मूल्यं आदर्शसञ्चिका न प्रहीयते । अवलोकनार्थं सञ्चिका अपेक्षमाणैः अष्टाणक पोस्ट-टिकीट प्रेषणं कार्यम् ।

व्हि. पी. द्वारा पत्रिका नैव प्रेष्यते । प्रतिवर्षं वर्षारंभे मनिऑर्डर द्वारा एव शुल्कं प्रेषणीयम् ।

ग्राहकेतरेषामपि लेखाः सरसाश्चेत् प्रकाश्येरन् । असुवाच्याक्षराः नीरसाः दीर्घतराकाराः कठिणतमाश्च लेखा नैव अवसरमासादयेयुः । सरलतमानां लेखानां प्रथमप्राशस्त्यं प्रदीयते ।

BOOK-POST

To,
Shree

भाषा,
व प्रति
कृष्ट

If addressee is not found
please return to sender.

Pandharinathacharya
Galagali
Editor Madhurwani
Madhurwani Office Gadag (Karnatak)

Printed at the New Gadag Printery Gadag. by P. S. Hombali
and Pablished by Pandharinathacharya Galagali at Gadag.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

LIBRARY HARDWAR

उडुपि श्री श्रीजगद्गुरु राघवेन्द्रमठाधीश श्री सुयमीन्द्रतीर्थ
स्वामिपादानां कृपापोषिता

मधुरवाणी

संस्कृत मास पत्रिकाः

शके १८८० विलम्बि संवत्सर मार्गशीर्ष-पुष्य संयुक्तङ्कः १२५९

प्रधान संपादकाः
कविकुलतिलक विद्यावैभव वेदान्तशिरोमणि साहित्यालङ्कार
राजा एस्. गुरुराजाचार्याः

卐

संपादकाः
गलगलीत्युपाव्हाः पण्डरीनाथाचार्याः

वार्षिक मूल्यं रु. ५-०० एकाङ्कस्य ०-५०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुरवाण्या मुख्य संचालकाः

श्री श्रीमद्राघवेन्द्र मठाधीश श्री सुयमींद्रतीर्थ स्वामिपादाः नंजनगूड्

मधुरवाण्या महा संरक्षकाः

श्री श्री विबुधेशतीर्थ स्वामिपादाः अधमारुमठ, उडुपी — प्रति वर्ष ५०५ रु. प्रदाः
श्रीमन्तः पद्मनाभराव वैद्य महोदयाः — " ५०५ "

प्रतिवर्ष १०१ रू प्रदाः मधुरवाण्याः संरक्षकाः

श्री श्री पेजावर मठाधीश स्वामिपादाः
" भंडारगिरि मठाधीश स्वामिपादाः
" श्री भीमनकट्टी मठाधीश स्वामिपादाः
" श्री श्री स्वादीमठाधीश स्वामिपादाः
" कूडली शृंगेरी मठाधीश स्वामिपादाः
श्री श्रीमद् व्यासराज मठाधीश स्वामिपादाः

विषयानुक्रमणिका

विषयाः	लेखकाः	पत्रसंख्या
१ मंगलम्	गलगली रामाचार्याः मधुरवाण्या भूतपूर्व संपादकाः	१
२ मासावतरणिका	,,	१
३ संपादकीयम्– महतां मिथ्याभाषणम्	संपादकः	२
४ महाकवयित्री मधुरवाणी	,,	५
५ मुद्राराक्षसस्य चाणक्यः	भट्टश्रीमथुरानाथशास्त्रि जयपूर	११
६ साधुसंगः श्रेयान्	दि. ग. श्रीनिवासाचार्य बुर्ली	१४
७ भारत सर्वकारस्य किमर्थं मौनम्	स. प. नाथ्रेकर	१६
८ संस्कृतस्य वैशिष्ट्यं शब्दानामन्वर्थत्वं च	वाचस्पतिः	१८
९ गांधीपुष्पांजलिः	म. म. कृष्णमूर्तिशास्त्रिणः मद्रास	१९
१० महासती श्रुतावती	परमेष्ठी	२१
११ कविवरः धनंजयः	कै. वा. अप्पाशास्त्री राशिवडेकर संस्कृतचन्द्रिका संपादकः	२४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुरवाणी

२३ वर्षे) विलम्बि संवत्सर मार्गशीर्ष-पुष्य संयुक्तांकः (अङ्कः ९–१०

❀ मङ्गलम् । ❀

राधे त्वं शरणं प्रयाहि न चिरात्, नाथ त्वमेवासि तत्
कान्ते शान्ततमं निशान्तमधुना किन्तेऽनभीष्टं परम् ।
का वा वल्लभकेलिलालसमना अन्तं निशाया लषेत्
एवं माधवराधिकारसलसच्चाटूक्तयः श्रेयसे ॥ १ ॥

राधानुषक्तमपि मामपराधिकं त्वं
जानासि मातरधुना न हि चित्रमेतत् ।
सन्तोषकारिणमपि स्मरतां जनानां
सन्तो वदन्ति सुधियोऽपि जनार्दनं माम् ॥ २ ॥

❀ मासावतरणिका ❀

त्वं शैत्यसाम्राज्यधुरन्धरोऽपि
रे मार्ग सर्वत्र जयोद्धतोऽपि
कान्ताकुचक्ष्माधरमाश्रितेभ्यो
ददासि चित्रं जयपत्रमद्य ॥ १ ॥

प्रालेयं विकिरन् नृणां कटकटध्वानं रदानां मिथः
सङ्घर्षाज्जनयंश्च दुःखयसि रे रोमाञ्चमुत्पादयन् ॥
पौष त्रस्तजनं त्वया दिनमणिर्गोप्तुं न शक्तः परं
शीतेऽप्युष्णतमं क्षमं स्तनयुगं मन्ये कुरङ्गीदृशः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो महतां मिथ्याभाषणम् ।



भगवतः अनुग्रहेण मधुरवाणी विलम्बिवत्सरे विलम्बेनापि वा स्वसञ्चिकाः प्रकटीकृत्य वाचकसमाराधनं संस्कृतसेवां च कुर्वाणैवास्ते । वर्षस्य प्रारंम्भे अस्याः पत्रिकायाः परिस्थितिः आर्थिकदुस्थितिश्च चिन्तनीया अनुकम्पनीया च आसीत् ।

महदिदंदौर्भाग्यं मधुरवाण्याः यत् महामहासंस्थानाधीश्वराः पीठाधिपतयः सन्यासिनोऽपि प्रतिश्रुतं धनमप्रदाय केवलम् आमिष-प्रदर्शनेन समाकलयन् शारदावंचनाम् । हा सत्यवादिते हतासि हा प्रामाणिकते निरालम्बासि । जितं मिथ्याभाषणेन । हन्त विजृम्भितम् अधर्मेण । अहो प्राबल्यं कलिकालस्य । यत् धर्ममार्गप्रवर्तकाः वेदान्त साम्राज्यसिंहासनं जगद्गुरुपीठमलंकृतवन्तो महान्तोऽपि यतीश्वराः निःशङ्कमेव सत्यस्य हत्याँ कर्तुं अस्मिन् वर्षे उपक्रान्तवन्तः । निर्भयमेव प्रतिज्ञाभंगं समाचरन्ति । सुरभाषाविद्रोहं अनुतिष्ठन्ति । नैते खलु प्रतिज्ञा भंगशूराः दरिद्रा येन तेषां सत्कार्यार्थं प्रतिश्रुतार्थस्य अप्रदानं सयुक्तिकंदोष दूरं वा स्यात्। तेषां क्षेत्रग्रामाद्यादायः अस्मिन् काले पूर्वस्मात् चतुर्गुणम-भिवृद्धः लक्षाधिकंरूप्यकात्मको वर्वर्ति । शिष्यसमूहादपि गुरुदक्षिणारूपेण अपारमेव धनं लभ्यते । प्राप्तायां इयत्यां महत्यां संपत्तौ असत्कार्येषु मुसलधारं व्ययीकुर्वन्तोऽपि धनराशिं संस्कृतप्रसारकार्यार्थं कपर्दिका-मात्रदानायापि संकुचन्ति, वाचा दत्तमपि पश्चान्निषेधन्ति शुष्काश्वासनैः कार्यकर्तॄन् प्रतारयन्तीत्यहो कौटिल्यं कालहतकस्य । मिथ्यावादपटूनां केषाञ्चित्पीठाधिपतीनां विचित्रौदार्यस्य विलक्षणसत्यसंधतायाः प्रव-ञ्चनाक्रमस्य प्रतिष्ठाकामुकतायाश्च कानिचन निदर्शनानि अङ्कान्तरे विवरीतुमभिलषामः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं नैतदस्माकं दुःखातिशयोद्गीर्णं वचनजातं सत्यमेव उदार-हृदयान् मधुरवाणी संरक्षकण्डलमलङ्कुर्वतः पीठाधिपतीन् मनागपि उपस्पृशति। मधुरवाण्या विपत्तिं दूरादेव श्रुत्वा स्वयं प्रेरणया शताधिक-रूप्यकान् तत्क्षण एव प्रेषितवतां श्रीश्री अधमारु, पेजावर, भण्डार-गिरि, स्वादि, भीमनकट्टि प्रमुख पीठाधिपतीनां आदर्शमार्गं निस्पृहवृत्तिं उदारधोरणीं सत्यनिष्ठतां च यदि अन्येऽपि पीठाधिपतयः अनुसरन्ति भजतां कल्पवृक्षानां श्रीश्रीमद्राघवेन्द्रमठाधीश स्वामिपादानां बलिकर्ण-दधीच्यादिह्लेपकवदान्यतासरणिमनुरुन्धन्ति वा तदा नास्त्येव सत्कार्य-जातानां विघ्नोपस्थितिर्नाम। परं संस्कृतस्य संस्कृतपण्डितानां च दुर्दैवेन विरला एव हि चरन्ति पूर्वोक्त परमहंस संसेविते लोकोपकारकारिणि औदार्यपथे। भगवान् भूतभावनः भार्गवीजानिः सर्वेषामपि यत्याश्रमिणां पीठाधिपतीनां प्रतिश्रुतार्थदानसुबुद्धिं पापभीरुतां असत्यभाषणभीतिं प्रतिज्ञाभङ्गे अधीरतां ब्राह्मणवंचनाविमुखतां च दिशतु इति संप्रार्थयामः।

महामहापीठाधिपतीनामेव यर्हि इयं कथा तदा किमु वक्तव्यं गृहस्थाश्रमिणां विषये। ते च अधिकारत एव मिथ्याभाषणं कर्तुमुप-क्रमेरन्। त्रिचतुरवर्षान् यावत् मधुरवाणीं तूष्णींस्वीकृत्य व्हि. पी. तु परावर्तयतां वीरवदान्यानां अभिवर्धमाना संख्या पत्रिकाणां मृत्युमार्ग-मेव प्रदर्शयति।

परमस्मिन् वर्षे अस्मद्गुरुवराणां श्रीश्रीभण्डारगिरिमठाधीश-स्वामिपादानां सातिशयानुग्रहभूम्ना कलकत्तानगरे मधुरवाण्याः सुमह-त्साहाय्यम् अनुप्राप्तम्। तेषां सदुपदेशप्रभावेन प्रभाविताः बहव एव हि कलकत्तानिवासिनः तदाज्ञया मधुरवाण्याः आजीवसभासदतां अंगीकृत-वन्तः। कलकत्तानगरे मुद्रणव्ययः पंचगुणमधिक इति अस्माकं इतःप्रस्था-नात्परं पत्रिकाप्रतिरोधनप्रसंग एव परापतित आसीत्। परमेते महनीयाः श्रीस्वामिपादानां ब्रह्मवर्चसा ब्रह्मविद्योपदेशेन च नितरामाकृष्टाः धर्म-मार्गोन्मुखीकृताश्च भूत्वा मुक्तहस्तं मधुरवाण्यै साहाय्यमारचयन्निति पंचसंचिकानां मुद्रणं कलकत्तायामेव सुकरं सुसंपन्नं च समभवत्। तेषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोदाराणां सहस्रशः अभिनन्दनानि विधाय नामनिर्देशं करिष्यामोऽधस्तात् ।

	दत्तरूप्यकानि
श्रीं के. रामा पै	१०१
श्रीयुत एच्. एन्. सत्यनारायण	१०१
,, सी. एन् वेंकटगिरिराव	१०१
,, वासुदेवराव अत्रे	१०१
,, के. शेषगिरिराव	१०१
,, सी, एस्. रंगस्वामि	१०१
,, नरसिंगदास अग्रवाला	१०१

एतेभ्यः सर्वेभ्योऽपि उदार चरितेभ्यः संस्कृतप्रेमिभ्यो महनीयेभ्यः श्रीरामचन्द्रः अखंडमायुरारोग्यादिकं प्रयच्छतु इति प्रार्थयामः । तथा

श्रीयुत ए. गोपालराव
,, एम्. जी एम् राव
,, एम्. एच्. आचार्य
,, टी. एस्. लक्ष्मीपति
,, एस्. श्रीनिवासराव

एतेऽपि महनीयाः १०१ रूप्यकदानं प्रतिश्रुत्य प्रतिमासं किञ्चित् किञ्चित् नियतं प्रेषयन्ति । तेषांएतेषां च कलियुगकर्णायमानानां कलकत्ता नागरिकाणां उपकारभरं कैर्वाशब्दैः व्यावर्णयामः । सत्यमत्यर्थमार्थिकसङ्कटे एव मधुरवाण्यै भूरिधनदानेन नितान्तमुपकुर्वतां अमीषां महानुभावानां औदार्यं सौहार्दं मैत्रीं च कथं वा विस्मर्तुं शक्नुमः । तथा तत्कृतमतिशयितमुपकारभारं तु न कथंकारमपि प्रत्युपकर्तुमीश्महे नित्यदरिद्रा वयं । परं तेषां उत्तरोत्तरामभिवृद्धिं संपदामुत्कर्षं च श्रियः पतिः दद्यादिति प्रार्थनां प्रतिदिनमाकलयामः ।

अन्येपि च कलिकातानगर्यां ५१; २५, १०, ५ रूप्यकानां साहाय्यदानेन मधुरवाणीमुपकृतवन्तः शतशो वदान्या विद्यन्ते । तेषां नाम निर्देशपूर्वकमभिवन्दनमङ्कान्तरे करिष्यामः इत्यलंपल्लवितेन ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविः मधुरवाणी

अयि पाठकाः! पूर्वस्मिन्काले यदेदं भारतं सर्वं विद्योपविद्याकला-कौशल्याध्यात्मविज्ञानवैदिकादिषु प्रथितमासीत्तदैव स्त्री-शिक्षायामपि तथैवासीत् । गीर्वाणवाण्या अगतपारे पारावारे एतादृशानां भवति लाभो वनितारत्नानां यैर्वेदान्तगणितकाव्यादिष्वग्रेसरत्वमधिगतम् । अधुनेवेदृशस्य काव्यकुशलस्य "मधुरवाणी" नामकस्य वनितारत्नस्य गवेषणापूर्णं चरितनिबंधनं मधुरवाणी वाचकेभ्यः रोचयितुं लेखनीं व्यापारयामः तथा तत्कृतः कश्चित्काव्यग्रन्थोऽधुना "बेंगलोर" प्रान्ते समुपलब्धः । स ताडपत्रे तैलङ्गलिप्यां लिखितो वरीवर्ति । सा कवयित्री "तञ्जौर" प्रान्ते "रघुनाथनायक" नामकस्य राज्ञः सभायां प्रतिवसति स्म । पण्डित यज्ञनारायणदीक्षितनिबद्ध "साहित्य रत्नाकर" काव्यत इदं ज्ञायते यदस्य राज्ञोऽस्तिताकालः क्रिस्ताब्दस्य ६६१४ आरभ्य १६६४ पर्यन्तं आसीत् ! अयं विदुषां रक्षणाथातीव स्पृहयति स्म । तथा स्वयमप्यतीव भारतीभक्त आसीत् ।

अयं भूप एव स्वंवशे प्रसिद्धिमगमत् । तञ्जौर प्रान्तीय "नायक" नृपपरम्परायां तृतीय आसीदयम् । अस्य जनकः "अच्चुतप्पा" तथा पितामहः "चिनच्यवप्पा" एतावुभावप्यतीव विक्रमशालिनावास्ताम् । तथा धर्मरक्षणव्यसनिनौ विद्यानुरागिणावपि । अयं रघुनाथनायको 'श्रीरामचंन्द्रं'—अतीव भजते स्म । तेनात्मनो राज्ये प्रभो रामचन्द्रस्य नैकान्यायतनानि विहितानि विधापितानि च । तेषु "श्रीरङ्गम्"—विजयराघवपुरम्, कुम्भकोणमित्यादिप्रदेशस्थानि प्रसिद्धतराण्यभूवन् । तीर्थप्रदेशेष्वपि धर्मशालादिविधानं तेनाकारि । तथा बहुत्रान्नसत्राण्यपि संस्थापितानि ।

एतज्ज्ञातुं वयं प्रभवामो यत्तस्मिन्समये गीर्वाणवाण्याः प्रचारः सम्यक्तयाऽवर्तत । सारस्वतं साहित्यं परां कोटिमाटीकत । तत्समकालवर्तिनोऽनेके कवयो लेखकाश्च दरीदृश्यन्ते । तेषु प्रधानतमास्तु—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१—गोविंददीक्षितः=हरिवंशसार-चरितस्य तथा संगीतसुधानिधेः कर्ता ।

१—यज्ञनारायणदीक्षितः=गोविन्ददीक्षितस्य पुत्रः, साहित्यरत्नाकर रघुनाथभूप विजय रघुनाथविलासनाटकानां कर्ता ।

३—राजचूडामणिदीक्षितः=प्रसिद्धरत्नखेटदीक्षितस्य पुत्रः रुक्मिणी परिणय कंसध्वंस रत्नक्षेत्रविजय शंकराभ्युदयानन्दराघव काव्यदर्पणादीनां— निर्माता ।

४—वेङ्कटेश्वरदीक्षितः=ख्यातस्य नीलकण्ठदीक्षितस्य पुत्रः वार्तिकाभरणादीनां प्रणेता ।

५—कुमारताताचार्यः = पारिजातहरण नाटकस्य कर्ता ।

६—भास्करदीक्षितः = आत्मपरीक्षादीनां रचयिता । एतेऽवर्तन्त ।

राज्ञा रघुनाथेनाऽपि गीर्वाणवाचि तथा तैलङ्गवाचि बहुविधा ग्रन्था अरच्यन्त । गीर्वाणवाणीरचितेषु प्रमुखास्तु— १. पारिजातहरणम् । २. नलाभ्युदयः । ३. अच्युताभ्युदयः । ४. रामायणसारसंग्रहः । ५. महाभारत सारसंग्रहः, इति विद्यन्ते । तैलङ्गभाषया रामायणं व्यरचि तेन ।

कस्मिंश्चिद्दिवसेऽयं रघुनाथराजो विदुषीभिः सभापूजिताभिः स्त्रीभिः परिवेष्टितः सभायामतिष्ठत् ।तासु वनितासु मध्ये कयाचिद्राजविरचितादांध्रभाषाग्रथिताद्रामायणात्श्लोका उद्धृत्य राजानं श्राविताः, अपरया नृपते रामस्य प्रेम सुवर्णितम् । एतत्सर्वं श्रुत्वा राज्ञो मनसि ये विचाराः प्रादुरभूवन् मधुरवाण्या ते निम्नतनश्लोकयोरुदाहृताः ।

हरेश्चरित्रं बहु तत्र रामकथासुधाकर्णरसायनं नः ।
आस्वाद्यमानापि सहस्रवारमयातयामैव सुखस्य दोग्ध्री ॥१॥

रसोत्तरं रामकथानुबंधि काव्यं मया कल्पितमांध्रवाण्या ।
कार्यं कया संस्कृतवाग्भिरेतदित्येव चित्ते गणयन्निवासीद् ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनयोस्तात्पर्यं–रामचरितं सहस्रवारं श्रुत्वापि तृप्तिर्न प्राप्नोति, मर्याऽऽध्रभाषया यद्रामचरितं तत्का स्त्री संस्कृते परिणमयिष्यति ? ।

एतदेव चिन्तयन्राजा सदोगृहं तत्याज । तस्यामेव क्षपायां श्रीसीतापतिः स्वप्न आगत्य तमाज्ञापितवान् = "राजन्! मा चिन्ताकुलो भूः, तवेच्छां मधुरवाणी सफलयिष्यति" इति । अपरेद्युः नृपेणाँध्रभाषाग्रथितं रामायणं संस्कृतेनानूदितुं मधुरवाण्याज्ञापिता । ततश्च मधुरवाण्यापि राज्ञ एषाऽऽज्ञा कौशल्येन समपूरि इति कथनेन किमपि नाविल्यम् । अस्य काव्यस्य १४ सर्गास्तथा १५०० श्लोका विद्यन्ते । तत्र १ सर्गस्य ३८ श्लोकेषु बहूनां देवदेवतानां प्रार्थनापूर्विका स्तुतिः कृता वर्तते । ततः श्लोकचतुष्टये वाल्मीकिव्यासकालिदासबाणमाघाद्यानां प्रशंसनं कृतम् । ततः श्लोंकद्वये नवीनकवीनामौद्धत्यं प्रकाशितम् । ततः ४५ तमेन श्लोकेन सुकविताऽलंकारसंभारभूषितललितललनया साकं तुलिता सा यथा–

संख्यावतां सर्वपथीनधीभिः संशोधिताचेत्कविता सभायां ।।
कस्तूरिकाचंदनकुंकुमाद्यैरुद्वर्तिताङ्गी युवतीव दीप्यते ।। इति ।।

अस्मात्परं राज्ञो रघुनाथस्यैश्वर्यवर्णनं तथा तस्य स्वभाववर्णनं बहुमधुरतया गिराकारि । ततः काव्यनिर्माणकारणमुपरिनिर्दिष्टं उल्लिख्य मधुरवाण्या स्वकाव्यस्य १ मः सर्गः समापितः ।

अस्मात्परं रामायणकथा प्रारभ्यते, द्वितीयतृतीयचतुर्थसर्गेषु दशरथतत्कृतयज्ञयोर्वर्णनं चकास्ति । पञ्चमषष्ठयो रामजन्म तच्छैशवक्रीडाश्च वर्णिताः सन्ति । सप्तमाष्टमयोर्विश्वामित्रागमन यज्ञरक्षण ताटकाहनन धनुःखण्डन विवाह भार्गवसंलापा निरूपिता विद्यन्ते । अतःपरं षट्सर्गेषु सीताहरण रामसुग्रीवसख्य वालिवध जानकीमार्गणादि सुस्पष्टं वर्ण्यते । एतावत्पर्यन्तं ग्रन्थश्लोकसंख्या ११५ संजाता, इतोऽग्रे १२६–१२९–१४० इति पृष्ठत्रितयं विनाऽवशिष्टो ग्रंथो नोपलभ्यते, किन्त्वेतत्तु निश्चितमेव यदयं ग्रन्थो नापूर्ण इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुरवाणी अस्मिन्ग्रन्थे स्वालौकिकप्रतिभापरिचयं सम्यक्तयाऽदात् । तत्त्वतस्तन्नाम मधुरवाणीति नासीत्किंतु गुणनिदर्शनमेतदुपनाम । यत इदमस्माच्छ्लोकादवगम्यते यत्–

" चतुरमधुरवाणीं सम्यगाकर्ण्य यस्याः
सदसि मधुरवाणी नाम दत्तं त्वयैव ।
सरसकृतिविधायां साधुमेधाविशेषा–
स्वधिकपटुरशेषास्वम्बुजाक्षीषु सैषा ।। इति ।।

एतदुपनाम भूनाथेन रघुनाथेन दत्तमासीत् । सा कीदृशी मेधाविशेषशालिनी, अलौकिकप्रज्ञाविद्योतिनी, कलाकुशलाचासीदिति तन्मुखजेनैव पद्येन विनिवेद्यते.

चातुर्यमेति कवितासु चतुर्विधासु
वीणाकलाप्रकटने भवति प्रवीणा ।
प्रज्ञामियं निपुणमञ्चति पाणिनीये
मेधां व्यनक्ति बहुधा विविधावधाने ॥

तत्तादृग्घटिकार्धनिर्मितशतश्लोकीफणिग्रामणी–
वाणीप्राकृतशास्त्रनैपुणसमुन्मीलद्यशःश्रीजुषा ।
वीणावादकलाविनोदसमये धृत्वा समस्याशतं
सद्यःसंसदि साधु पूरयति या दत्तं कवीन्द्रैस्तथा ॥२॥ इति ॥

पश्यन्तु पाठकाः ! किमिदं नासाधारणं कार्यं ? विशेषतस्त्वबलाया यद्यपीयमतिशयोक्तिरिति केचिन्मन्येयुस्तथापि तस्या अलौकिकप्रतिभायां काव्यमाधुर्ये निर्माणशक्तौ च न स्यात्कस्यापि विवादः । यद्यप्यनेन कविना स्वस्य स्वस्वामिनश्च प्रशंसाशतैः काव्यमिदमलंकृतं तथापि न तेन स्वपित्रोर्वासस्थानस्य चोल्लेखः कृत इति वयं तस्य विशेषवार्तां ज्ञातुं न प्रभवामः । एतत्तु जानीमो यत्सा विद्याविद्योतिनि कुले जाता तथाऽद्वैतमतावलम्बिन्याऽऽसीत् इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य काव्यस्य हस्तलिखितं पुस्तकं तैलङ्गलिप्यां वर्तते तदनेन कविना स्वहस्तेनैव लिखितमिति ज्ञायते। अस्य कारणं तु तेषु कृतं संशोधनमपि पुस्तकलेखकीयमेव दृश्यत इति। ग्रन्थोऽयं 'मैसूर' प्रान्ते लब्धः, नायकवंशकाले 'तञ्जावरमैसूरयो' रतीवसंबंध आसीत्। मधुरवाणी 'मैसूर' प्रांतनिवासिन्येवासीत्। अस्तु यद्भवतु तद्भवतु निःसंशयं त्विदमेव यत्सा नारीरत्नं आसीत्। एतत्तु ज्ञायत एव यत्तदानीं वनिताशिक्षणमुच्चैरवर्तत। नायकराजस्य सदस्येव बह्वयो विद्याकलाशालिन्यः स्त्रियोऽवर्तन्त इति निम्नश्लोकादेव ज्ञायते—

विपञ्चिकायां चतुराः प्रगल्भाः शास्त्रेतिदक्षाः सरसप्रबंधे।
समीपमेतस्य समेत्य केऽपि सुभ्रूजनाः स्वस्वकला व्यवृण्वन् ॥ १ ॥
सर्वोत्तमस्वादिमसंस्कृतान्ध्रप्रबंधनिर्माणपचेलिमानि।
यशांसि भूयांस्यवतारयन्त्यः सहस्रशः सन्ति सरोजनेत्राः ॥ २ ॥

एतत्तु भारतीयानां महते गौरवायैव यद्वर्षत्रिशतेः प्रागेवालौकिककाव्योत्पादनशक्तिशालिन्यो वनिता जायन्ते स्मेति। किं भारतमिदं पुनरपि प्राचीनं गौरवमाप्नुयात्? इत्यलं विस्तरेण।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राराक्षसस्य चाणक्यः ।

ले०— साहित्याचार्यपण्डितभट्टश्रीमथुरानाथशास्त्री, कविरत्नम् ।

विशाखदत्तकवेर्मुद्राराक्षसं संस्कृतसाहित्यसेविनां कृते एकस्य नवीनप्रकारस्योपहार इति हृदयेन वक्तव्यं भवेत् । यतो ह्यस्मिन् साहित्ये शृङ्गाररसमङ्गिनं कृत्वा प्रवर्तमानानां नाटकादीनां नावलोक्यते प्रायोंऽशतोपि न्यूनता । एवं वीररसप्रधानान्यपि 'रूपकाणि' नास्मिन् वाङ्मये दुर्लभानि । किं बहुना ! भगवन्तं श्रीरामचन्द्रमेव नायकीकृत्य निजरङ्गमञ्चं संचालयतां नाटकानामेव तावद् गवेष्यतां संख्या ! मन्येऽहमन्येषां सर्वेषामप्यपेक्षया एवंविधनाटकानां संख्या भूयस्तरां प्रवृद्धा भवेत् । अस्तु ! एतस्योत्तरं कवीनामक्षरेष्वेव—

स्वसूक्तीनां पात्रं रघुतिलकमेकं कलयतां—
कवीनां को दोषः स तु गुणगणानामवगुणः ।

इति यद्यपि दातुं शक्नुयाम्, परं विशदविशालेऽपि संस्कृतसाहित्ये एवंविधानि कति वा नाटकानि सन्ति, येषु राजनीतेरन्तस्तलं प्रविश्य तदङ्गानां मार्मिको विचारः प्रस्तुतो भवेत् ?

एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।

इति एवकारशृङ्खलया जनतारुचिं निगडयद्भिरस्माकं नाट्याचार्यैर्यद्यपि वीररसः परिगृहीतोऽस्त्यभिनये, परं सोऽयं रसः खड्गानां झणत्कारैर्वीराणां हुंकारैरेव वा संकुलः समाप्यते । वीरस्य स्थायी य उत्साहस्तत्र सहायान्वेषणादीनां नीत्यङ्गानां या आवश्यकता भवति सा वराकी सर्वत्रोपेक्षिता विस्मृतप्राया वा भवति । परं मुद्राराक्षसं तादृगस्ति यत्र नीतेः, तत्रापि च कुटिलनीतेरुत्थानपतनानि तादृशेन संविधानेन च कौशलेन च चित्रितानि यान्यालोकयतां सहृदयानां मनो विस्मयविवशं संपद्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राराक्षसस्य जीवश्चाणक्यः । आपाततो दर्शने नाटकस्य नायकश्चन्द्रगुप्तः प्रतीयते, परं तत्त्वतो विमर्शे तु नायकस्यापि नायकः सोऽयं श्रीमान् चाणक्योऽस्ति । उत्तरगोग्रहणसमये विराटतनय उत्तरो रथमधिष्ठाय यद्यपि रणरङ्गमवतीर्णवान् परं महाभारतपाठकानां नेदमविदितं यत्सोऽयं वराक उत्तरस्तु केवलं नाममात्रार्थमेव, शौर्यं तु यत्प्रदर्शितं तद्धि गाण्डीवधन्वनोऽर्जुनस्यैव बाहुविलसितम् । एवमत्रापि यत्किञ्चन कौशलमस्ति तस्य सर्वस्यापि मूलं सोऽयं 'कौटिल्यः' । मुद्राराक्षसे चाणक्यस्य यच्चित्रमङ्कितमस्ति तद्धि कुटिलराजनीतेरेकं जीवितमालेख्यम् ।

चाणक्यस्य संबन्धे अनेके किल ऐतिहासिकाः प्रवादा एतद्देशे प्रचलिता आसन्, किन्तु तान् प्रवादान् विशाखदत्तश्चाणक्यचरित्रस्य भित्तिस्वरूपतया नावलम्बितवान् । एतस्य कवेः प्रबला कल्पनाशक्तिः सकलानेतान् प्रचलितप्रवादान् गौणतया संगृह्यापि चाणक्यस्याद्भुतां प्रतिभामेकया स्वतन्त्रशैल्यैव चित्रितवती । नाटकस्यास्य चाणक्यो ब्राह्मणकर्मनिष्ठस्त्यागी, तथापि कूटनीत्यां तादृशः परिनिष्ठितो यद्यावदायुः कूटनीतिव्यवहारपटिष्ठो बुद्धिबलदुर्जयतया राक्षसोऽपि शत्रू राक्षसो न तावद् बाह्योपचारेणापितु स्वगतमेव शतमुखं प्रशंसति– 'अयं स दुरात्मा अथवा महात्मा कौटिल्यः –

आकरः सर्वशास्त्राणां रत्नानामिव सागरः ।
गुणैर्न परितुष्यामो यस्य मत्सरिणो वयम् ॥'

सर्वशास्त्रपरिशीलनव्यग्रोऽपि सोऽयं लोकव्यवहारेष्वपि तादृङ्मार्मिको यत् चन्द्रगुप्तस्य शयनगृहे छिद्रमुखे पिपीलिकासमूहमणुकणान् गृहीत्वा बहिर्निःसरन्तं दृष्ट्वैव तत्र जननिवासमनुमितवान् । किं बहुना! कस्य बुद्धिस्तादृक् तीक्ष्णा यदिङ्गितमात्रेण सोऽयं कार्यस्यान्तस्तले प्रविश्य सत्यं सत्यं तत्तत्त्वमवगच्छति स्म ।

चाणक्यविषये ये किल प्रवादाः प्रचलिता आसंस्तेषु प्रसिद्धान् कांश्चिन्निम्ने उल्लिखामि, येषां परिज्ञानेन चाणक्यचरित्रभित्तिर्बहुतर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मवगता भवेत् । कुशकण्टकैः पदं विच्छिन्नमिति प्रतिहिंसापरायण-श्चाणक्यः अरण्यव्यापिनां कुशानां मूले तक्रं परिषिच्य तान्निःशेषयितुं चेष्टामकरोत् । महाराजेन नंदेन सोऽयमपमानित इति कृत्वा मुक्तायां निजशिखायां हस्तपरामर्शपूर्वकं सोऽयं सर्वसमक्षं प्रतिज्ञां चकार-- 'नन्दवंशस्य ध्वंसमकृत्वा नाहमात्मनः शिखामिमां भन्त्स्यामि ।' एत-त्प्रतिज्ञाऽनुसारमयं नन्दपरिवारमभिचारप्रक्रियाद्वारा मृत्युमुखं निन्ये । नन्दवंशस्य परिशिष्टो राजा सर्वार्थसिद्धिश्चाणक्यक्रोधानलादात्मानं गोपयितुमरण्यवासी बभूव, परं स तत्रैव कौटिल्यस्यास्य गुप्तप्रेरणया निभृतं निहतोऽभूत् इति ।

अन्यो यदि कश्चिन्नाटककारोऽभविष्यत् तर्हि विचित्राणि च गुरु-तराणि च इमान्येवेतिवृत्तान्युपकरणीकृत्य चाणक्यचरित्रं चित्रयितुं प्रवृत्तोऽभविष्यत् । किन्तु विशाखदत्तस्तथा नाकरोत् । पूर्वोक्तप्रवादानां प्रकाशस्तदङ्किते चाणक्यचरित्रे नापतदिति नाहं वच्मि, किन्तु एतद्वारा चरित्रस्य प्रधानमंशः आलोकितो नाभवत् । येन किल प्रकाशेन तदङ्कितं चाणक्यचित्रं सुस्पष्टतरमभवत् स हि प्रकाशः कवेः कल्पनासर्वस्वभूतः ।

नन्दवंशस्य ध्वंसः साम्प्रतमेव संजातोस्ति । एतद्वंशं प्रति असा-मान्यभक्तिपरायणो मन्त्री राक्षसो म्लेच्छराजतनयं मलयकेतुमाश्रित्य चन्द्रगुप्तस्य विपक्षतायामुद्यतोऽस्ति । परं राजनीतेराकरभूतश्चाणक्यो न किञ्चिदेतत्परिगणयति । एवं हि चन्द्रगुप्तराज्यं स्थिरीकर्तुं सर्वात्मना बद्धपरिकरः अयं हि बहिष्टो राक्षसविपक्षे स्थितोऽपि तस्य राजभक्तिं राज्यपरिचालनपाटवं च हृदयेन भूयस्तरामभिनन्दति । मतिमांश्चाणक्यः सुचिरं विचिन्त्य स्थिरीकृतवान्– 'यदि राक्षससदृशो मन्त्री चन्द्रगुप्त-राज्यं परिचालयेत्तर्हि तदिदं दृढं भवेत् । परं स तु सांप्रतं सुतरां विपक्षः । नन्दकुलेऽविचलितभक्तिमान् स बलेन प्रलोभनेन वा न सहसा वशीकर्तुं शक्यः, किन्तु अमात्यराक्षसं चन्द्रगुप्तस्य पक्षभुक्तमकृत्वा गुप्तसिंहासन-मेकान्ततो निर्विघ्नं परिगणयितुं न शक्यते । अत एव यैः कैरप्युपायैः राक्षसः स्ववशे करणीय एव ।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाटकस्य मुखबन्धे विशाखदत्तश्चाणक्यस्य मुखेन सूक्ष्मसूचनार्थं भाषयति– 'अगृहीते राक्षसे किमुत्खातं नन्दवंशस्य किं वा स्थैर्यमुत्पादितं चन्द्रगुप्तलक्ष्म्याः ?' किन्तु तदेतदुद्देश्यं विस्तृतवक्तृताद्वारा गुरुतररूपे कुत्रचिदपि सुस्पष्टं नासौ कृतवान् । यावत्किल नाटकं न परिसमाप्यते पाठकैस्तावत् गुप्ततममिदमुद्देश्यं न कस्यचिद्धृदये सुस्पष्टमवभासते । सप्तमाङ्कस्य शेषपर्यन्तं प्राप्नुवन्तः पाठकमहाभागास्तु विलोकयेरन् यत् नाटके आदिमारभ्य अन्तपर्यन्तमयमेवाऽभिसन्धिः सर्वात्मना विकसितोऽस्ति । यदि तदेतदुद्देश्यं प्रथमत एव विशेषतो विस्पष्टमभविष्यत् तर्हि शेषाङ्के पाठकानामेतावान् विस्मयश्च चमत्कारश्च नौदैष्यत् ।

सर्वशास्त्रपरिनिष्ठितमतिर्विलक्षणप्रतिभश्चाणक्यो यस्मिन् कार्ये किञ्चिदभिमानपुरस्सरं प्रविशति तस्य कार्यस्य महत्त्वं स्वत एवानुमातव्यं स्यात् । प्रथमाङ्के चाणक्यो राक्षसस्य राजभक्तिं विचिन्त्य हृदयस्यान्तस्तलेन प्रसीदति– 'अमात्यराक्षस! साधु! साधु मन्त्रिबृहस्पते! साधु! सर्वैश्वर्यसंपन्नं स्वामिनं ये किल सेवन्ते तादृशः सन्ति बहवः, परं भर्तृराज्यस्य नाशेऽपि निःसङ्गया भक्त्या तत्कार्यनिर्वाहिका भवादृशाः सुतराँ दुर्लभाः । अत एवास्माकं त्वत्संग्रहे यत्नः, कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति ।'

राक्षसस्य वक्रां नीतिं स्वविरोधकरणं चापि स्मृत्वा स कथयति– 'असौ मलयकेतुमङ्गीकृत्य अस्मदुच्छेदाय विपुलतरं प्रयत्नमुपदर्शयत्येव' । ततो व्यङ्ग्यविधया किञ्चिदभिमानं सूचयंश्चाणक्यो वदति– 'तन्मयाऽप्यस्मिन् वस्तुनि न शयानेन स्थीयते, यथाशक्ति क्रियते तद्ग्रहणं प्रति प्रयत्नः अस्तु !

इतिहासप्रसिद्धान् प्रवादान् विशाखदत्तो नाश्रितवान् । एतस्य कारणमिदमस्ति यत् मुद्राराक्षसे चाणक्यस्य नीतिरधिकांशस्थलेषु शत्रुप्रचालितया नीत्यैव निजस्य सार्थकतां संपादयति । या नीतिरुद्दिष्टपथं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तुं नानाविधानुपायान् स्वयं कृत्वा सफला भवति अवश्यं सा प्रशंसनीया; परं तदपेक्षया सा किल नीतिरधिकाधिकं प्रशंसनीयाऽस्ति या हि स्वयं न कञ्चिदपि मार्गमन्विष्यति। प्रत्युत शत्रोः प्रवर्तितां नीतिमेव निजोद्देश्यं प्रति संलग्नां कृत्वा तद्वैफल्यं प्रदर्शयेत्। तस्य वैफल्यस्य मध्य एव च निजसफलतायाः सुदृढां भित्तिमनायासं स्थापयेत्। 'चाणक्यो नानाविधैरुपायैर्नन्दकुलस्य ध्वंसं संपादयति' एतद्यदि वर्णनीयमभविष्यत् तर्हि चाणक्यस्योद्देश्यं सुस्पष्टं कृत्वा, तस्य नीतेर्मार्गः सुनिर्दिष्टः कर्तव्योऽभविष्यत्, किन्तु विशाखदत्तो न तथा करोति।

साधुसङ्गः श्रेयान्

अस्ति किल महाराष्ट्रे कृष्णावेण्यास्तटे हरिपुरं नाम नगरम्। तत्र च आसीद् ब्राह्मणः श्रीमान् समृद्धधनधान्यसम्पद् गणपतिर्नाम। तस्य बाल्ये एव पिता ग्रन्थिज्वरेणाभिभूतः परलोकमगात्। बाल एवायं खलसंसर्गात् विद्याभ्यासविधुरः अमार्गे मतिमकरोत्। मात्रा तत्रतत्र निहितं धनं चोरयन् खाद्यपेययोरर्थे व्ययीकुर्वन् दुर्द्यूतादिक्रीडासु परायणः कालमतिवाहयन् तारुण्यमवाप। ततो मद्यमांसादि दुर्व्यसनासक्तः परस्त्रीभोगलालसः अखिलां सम्पदमपि व्ययीचक्रे। ततो धनार्थं मातरम् मुहुर्मुहुः लगुडैः प्रहर्तुमारेभे। व्यसनाधीनोयं चोरजार शिरोमणिः गृहारामक्षेत्रादिकमपि सर्वं व्यक्रीणात्। तद्धनमपि सर्वं व्ययीचक्रे। एकस्मिन्नहनि प्रहारभीता माता पुत्रस्य दुर्गुणगणवमलोक्य दुःखसन्तप्ता आत्मानं कूपे निपात्य प्राणानत्याक्षीत्। तदा गृहीतो रक्षापुरुषैरयं कारागृहं प्रवेशितः। अस्य मित्राण्येव साक्षिणो भूत्वा अयमेव मातरं निहत्य कूपे प्राक्षिपदिति न्यायाधिकारिणः पुरतः प्राहुः। प्राड्विवाकोऽपि मरणदण्डेन तं युयोज। शूलारोपणात् प्रागय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निशायां प्राणरक्षणोपायमन्विष्य वंचयित्वा द्वारपालकान् कारागृहात् निस्सृतः पलायांचक्रे। ततश्च धूर्तोऽयं गृहीतकपटतपस्विवेषः गिरिकन्दरेषु विलीनस्तृणपर्णादिना कृताहारो विविधवृक्षसान्द्रे सुन्दरे कस्मिंश्चिदाश्रमे साधुवृन्दमपश्यत्। तेषां सच्चरित्रनिरीक्षणेनैव समुपजातसुमतिः पश्चात्तापतप्तः साधुवर्यं प्रणम्य निवेदितनिखिलोदन्तः शरणमगात्। अनुगृहीतश्च साधुभिरसौ विहिताचारपरायणः कृतप्रायश्चित्तः भगवदाराधनपरायणो ब्राह्मणः चिंतयामास। अहो योऽहं खलाग्रेसरःचोरजारशिरोमणिर्भूत्वा सहस्रशः अक्षम्यानपराधान् आचरम् स ए वाहं तपस्विवेषमवलम्ब्य रक्षापुरुषैः अपरिज्ञातरूपो दिष्टया तपस्विनां महापुरुषाणां सन्निधिमुपागतोऽस्मि। यदि मे प्रागेव महापुरुषसहवासः अभविष्यत् तर्हि उध्दृतः कृतार्थः अभविष्यमिति। एवं चिंतयन् स साधुसंगमहिम्ना साधुरेव भूत्वा सदुत्तमं फलमवाप। अतः किल यदा कदापि वा दुस्संगः सर्वथा वर्जनीयः। तथा साधुसंगः सर्वदा सर्वथा श्रेयानिति सुधियो विचारयन्तु महाभागा इत्यलम्।

❀ वाचकेषु सादरसूचना ❀

अस्मिन् वर्षे महति वित्तसङ्कटे पतितैरपि अस्माभिः कलकत्ता गतमहाजनानां उदारसाहाय्येन अद्य यावन्नवसञ्चिकाः कृच्छ्रात्प्रकाशिता। सर्वेऽपि ग्राहकाः देयधनं इतःपरमपि यदि विनाऽस्मद्याचनां प्रेषयेयुः तदा एतद्वर्षस्य उर्वरिताङ्का अपि सुखरूपेण आविर्भावयितुं शक्यन्ते। अतः कृपया एतदङ्कावलोकनक्षण एव ग्राहकधनं संप्रेष्य अनुग्राह्योऽयं जनः, प्रोत्साहनीया मधुरवाणी, संपादनीयमानृण्यमिति सूचयामः।

—संपादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतसर्वकारस्य किमर्थं मौनम् ।

(लेखक :- स. पं. नाथ्रेकरः)

आँग्लसत्तायां अस्माकं भारतदेशे सुरभारत्याः देववाण्याः संस्कृत-भाषायाः महती क्षतिर्जाता । कुटिलाः आँग्लाः सस्यपूरितक्षेत्रसंहाराय सस्यसंहारकपक्षिणः इव भारतीयसंस्कृतिसंहाराय बद्धपरिकरा आसन् । अतस्ते तथा उपायान् नियोजयामासुः यथा भारतीया संस्कृतिः साहित्य-मितिहासः परम्परा च निःशेषा भवेयुः । परं भारतीयसंस्कृतेरभिमानिनो महता कष्टेन प्राणमूल्यैरपि तां रक्षितुं प्रयत्नं चक्रुः । यावद्वयं पारतन्त्र्ये आस्म तावद् देववाण्या ईदृशी विडम्बना सोढव्या अस्माभिः ।

परं १९४७ ख्रिस्ताब्धे अगस्तमासस्य पञ्चदशे दिनाङ्के अस्माकं राष्ट्रं पारतन्त्र्यान्मुक्तं अभवत् । वयं सर्वे भारतीयाः विविधजीवन-क्षेत्रेषु अभिनवं स्वातन्त्र्यमन्वभवाम । तमोनाशात्परं यथा सर्वत्र रवि-किरणानां सञ्चारो भवति तथा अखिले भारतराष्ट्रे नवविचाराणां सञ्चारोऽभवत् । भारतसर्वकारेण राष्ट्रस्य पुनर्रचनां कृत्वा राष्ट्रजीवने नवचैतन्यं निरमीयत । तत्तत्प्रान्ते तत्तद्भाषायां सर्वः शासनव्यवहार आरभ्यत । तेन सर्वे जनाः स्वराज्ये लोकराज्यस्य अद्वितीयं सुखमन्व-भवन् । एतद्व्यतिरिक्तं भारतसर्वकारेण हिन्दी–संस्कृत–आँग्लभाषाणां आयोगान् नियुज्य तदधिकृत्य सर्वराष्ट्रस्य जनानां अभिप्राया ज्ञाताः ।

संस्कृतभाषायोगः श्रीमतः सुनीतिकुमार चटर्जीमहोदयस्य अध्यक्षतायां नियुक्त आसीत् । अनेन आयोगेन महत्प्रयासेन अखिल-भारते भ्रमणं कृत्वा प्रमुखैः विद्वद्भिःसह चर्चां विधाय प्रधानसंस्थाभिः सह विचारविनिमयं कृत्वा स्ववृत्तान्तः भारतसर्वकाराय दत्तः । मया अस्य वृत्तान्तस्य सारः पठितो दैनिकवृत्तपत्रेषु । इमं वृत्तान्तं पठित्वा मे नेत्रयोरग्रे आशाकिरणा व्यलसन् । यतः अस्मिन्वृत्तान्ते संस्कृतभाषाया राजभाषा इति स्थानं तथा माध्यमिकशालानां शिक्षणक्रमे तस्या अनिवार्यस्थानं मन्तव्यं इति सुस्पष्टतया विशदीकृतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनन्तरं तु मया अनुभूतं यत् भारतसर्वकारस्य एतद्विषयक-प्रयत्नाः पिपीलिकागतिरिव मन्दाः शिथिलाश्चाभवन् । द्वित्रमासावधि-पर्यन्तं भारत सर्वकारेण नैकमपि अक्षरं उद्गीर्णमस्मिन्विषये । त्रिन्मासे-भ्योऽनन्तरं भारत सर्वकारेण एतावदेव उत्तरं दत्तं यदेतद् वृत्तान्तस्योपरि विचारं कर्तुं तेनैको विशिष्टो राजपुरुषो नियुक्तः स अचिरादेव तदन्तरेण अन्तिमनिर्णयस्य घोषणां विधास्यति । परं हन्त ! तदनन्तरं कस्मिन्नपि दैनिके साप्ताहिके मासिके वा मया एतत्सम्बधि किमपि वृत्तं नाव-लोकितं । भारतसर्वकारस्य तस्य स्पष्टीकरणस्य अद्य चत्वारो मासा जाताः । परं तेन राजपुरुषेण अद्यापि तस्य निर्णयो नोद्घोषितः । भारतसर्वकारेण अस्मिन्विषये ईदृङ्मौनं किमर्थं स्वीकृतमिति ज्ञातुमहं न शक्नोमि । ईदृङ्मूलगामि विषयसम्बन्धे भारतसर्वकारस्य ईदृगौदा-सीन्यं ईदृशो विलम्ब आश्चर्यकर एवेति अहं मन्ये । डॉ. राजेंद्रप्रसाद कन्हय्यलाल, मुन्शी, सम्पूर्णानंद, चिन्तामणि देशमुख प्रभृति राज-पुरुषाणां संस्कृतविषये आनुकूल्यं दृष्ट्वा मया कल्पितं यदेतत्प्रचलित शैक्षणिकवर्षारम्भे एव कोऽपि अनुकूलो निर्णयः उद्घोषितो भवेत् तथा संस्कृतभाषाया राजभाषा इति स्थानं सम्मान्य माध्यमिकशालासु तस्याः शिक्षणं अनिवार्यरूपेण प्रचलितं भवेत् । कदाचिदेतत्कल्पनस्य कारणं ममातीवोत्कण्ठा भवेदित्यहमङ्गीकरोमि । परं भारतसर्वकारस्य एतद्विषयकमौनस्य कारणं ज्ञातुमहमसमर्थोऽस्मि : अहं जानामि यदस्याः योजनायाः प्रत्यक्षव्यवहारे ईषद्विलम्बःस्यादेव । परं यदि भारतसर्वकार इमां योजनां सुयोग्यां मन्यते तर्हि तस्य प्रथमं कर्तव्यं भवति यत्सः अस्या योजनाया विषये स्वस्य सम्मतिं उद्घोषयेत् । तस्याः प्रत्यक्षो व्यवहारो यदि ईषद्विलम्बेन भवेत् तर्हि कोऽपि प्रत्यवायो नास्ति परं येन सर्वकारेण संस्कृत-आयोगं नियुज्य संस्कृतभाषामधिकृत्य समुचित आदरो दर्शितः तेनैव सर्वकारेण ईदृशी अनास्था दर्शितव्या इति अतीव विस्मयजनकम् । संस्कृतआयोगनियुक्तेःसफलता तदा एव स्यात् यदा आयोग-योजना यथातथैव प्रत्यक्षव्यवहारे नियुक्ता भवेत् । एतदन्तरेण इदानींतनेषु द्वित्रिमासेषु काभिः संस्कृतसंस्थाभिरपि कोऽपि प्रयत्नो न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहित इति दृश्यते । तथा कस्मिन्नपि संस्कृत मासिके साप्ताहिके वा-संस्कृत-आयोगवृत्तान्तपरीक्षणात्मका लेखा अपि लिखिता न दृश्यन्ते ।

ममातीवोत्कटकामना अस्ति यद् येनकेनप्रकारेणापि इयं योजना शीघ्रमेव प्रत्यक्षव्यवहारे नियुक्ता भवेत् । तथा स्वल्पेनैव कालेन भारत-देशे संस्कृतभाषायास्तथा भारतीयसंस्कृतेरभ्युदयम् अत्युज्ज्वलभवितव्यं च द्रष्टुमहमत्यन्तमुत्सुकोऽस्मि । यदा भारते राष्ट्रे सर्वासु शिक्षणशाखासु संस्कृतभाषा प्रयुक्ता भवेत् तदा तच्चित्रमतीव रमणीयमाह्लादकरं च भवेत् इत्यत्र न कोऽपि सन्देहः । भारतदेशः अखिले जगति आदर्शं राष्ट्रं-भवेत् । यस्मिन् राष्ट्रे विवेकानन्द-गान्धी-विनोबासदृशा महात्मानो जगति सर्वेभ्यो मानवतायाः समतायाश्च सन्देशं ददति तस्मिन् राष्ट्रे सुरभारत्या देववाण्याः संस्कृतभाषायाः प्रचारः समुत्कर्षश्च पयसि शर्करा इव सम्यक् संगः स्यादित्यत्रसंशयलेशोऽपि नास्ति ।

संस्कृतस्य वैशिष्ट्यं शब्दानामन्वर्थत्वं च

संस्कृतभाषायामपरं वैशिष्ट्यमन्यभाषाभ्यो यत् शब्दानां व्युत्पत्त्यैव तादृशार्थबोधक्षमत्वं । यथा पातीति पिता । दीपयतीति दीपकः नृन् पातीति नृपः । रथमर्हतीति रथ्या । पचतीति पाचक इत्यादयः शब्दाः स्वरूपोच्चारणेनैव तन्तमर्थं बोधयन्ति । नैतादृगन्वर्थत्वं भाषान्तर उप-लभ्यते । न हि लालटेन शब्दोच्चारणे प्रकाशकत्वरूपार्थावगतिः । एवं संस्कृते द्विवचनमपि वर्तते तेन कर्तृवाचकपदमन्तरापि 'स्तः' 'गच्छतः' इत्यादितः कर्तृद्वयप्रतीतिर्जायते । नायमपि सुलभोपायोऽन्यभाषासु । तत्र तु (दोज्टूगो) इति (वे दोनों जाते हैं ।) (ते दोघे जातात ।) इत्यादि प्रयोग एव कर्तृद्वयप्रतीतिर्भवति नान्यथा । अपि च कर्तृ-कर्म-भावप्र त्ययानां संस्कृते प्रत्ययेभ्य एव बोधस्तदर्थं न पदान्तरापेक्षा । भाषान्त-रेषु तु तादृशपदप्रययोगमन्तरा नैव बोधो भवेत् इतोपि संस्कृतभाषा-वैशिष्ट्यमतिरश्चीनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

श्रीगान्धिपुष्पाञ्जलिः ।

(आकाशवाण्या श्रावितचरः)

॥ म. म. कृष्णमूर्तिशास्त्रिकृतः ॥

श्रियै भूयात्स्वर्गादपि सुखकरी भारतमही
प्रसूर्ज्ञानाचार्या स्वयमितरदेशेष्वपि सताम् ।
महात्मा श्रीगान्धिर्व्यजयत स यस्याश्चिरतपः-
फलं पुत्रश्छिन्दन्दृढनिगडबन्धं प्रयतनैः ॥ १ ॥

बध्नीमोऽञ्जलिमञ्जसात्मविदुषे सत्यैकतिग्मत्विषे
स्वार्थं कञ्चिदजग्मुषे परकृते श्रान्ति परामीयुषे ।
हिंसां जात्वपि चेतसाप्यविदुषे कल्याणवाणीपुषे
रागद्वेषमुषे महात्म इमे गान्ध्याह्वयज्योतिषे ॥ २ ॥

सन्धित्सुःस्वैर्विगलितरदस्निग्धवक्त्रोत्थहासैः
हस्तेनोतं किमपि वसनं जानुदघ्नं वसानः ।
सोऽयं राजप्रतिनिधिमुपासर्पदिर्विन्प्रभुं श्री-
चर्चिल् "सन्धिर्बत ! न घटते भिक्षुकेणेत्य"वोचत् ॥३॥

स्वोपज्ञेन महायुधेन दृढधीःसत्याग्रहेणादितः
येनान्यानधिदक्षिणाफ्रिकमसौ जित्वार्जुनान्वर्ष्मभिः ।
तेनैवाङ्गलजनाधिपत्यम"पयाह्यस्माच्छुभाद्भारता"-
दित्येवं बत! सात्विको गतभयं स प्रेषयामासिवान् ॥४॥

अनैक्यमुरुमार्जवात्परिजहार मित्रं सतां
समस्तमतसारदृग्जगति हिन्दुमुस्लीङ्गतम् ।
स्वयंसमुददीधरद्धरिजनान्दयाशेवधिः
स्वदोषगणगोपने भृशमशक्त एवास्फुरत् ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्धारमूलमतिवेलमसावनिच्छ-
न्यन्त्रालयांश्च निखिलानधनैकबन्धुः ।
चर्काख्यचक्रमुपजीवनसाधनं स्व-
कृत्येन सम्यगवबोधयति स्म शान्तः ॥ ६ ॥

अभ्यस्तव्यं समस्तैरपि नियतमिदं संस्कृतं भारतीयैः
गीतार्थं वावगन्तुं, यदहमपठिषं प्राक्च कारागृहस्थः ।
मालव्यात्पण्डितादित्यवददपि करंचन्दगान्धिर्महात्मा
मैलापूर्देववाणीनिलयमुपगतः, संस्कृते प्रेम तादृक् ॥७॥

रघुपतिराघववैष्णव-
जनतोगीतैकरसिकरसनोऽयम् ।
प्राणोत्क्रमणावसरेऽ
प्यजपत्स्मृत्याहि राम रामेति ॥ ८ ॥

श्रीराजेन्द्रप्रसादो जगति च जवहर्लालनेरुःसुमन्त्री
द्वावेतौ यस्य शिष्यौ सुविमलयशसौ क्षेमकारौ प्रजानाम् ।
कस्तूरीबाय्च साध्वी सति पथि चरितुं साग्रहा यस्य भार्या
तस्मै लोकःसमस्तःस्तुतिमिह तनुतां भारतीयैकपुत्रे ॥ ९ ॥

तत्तत्प्राक्तनसत्कलावरणसंस्कारप्रचारोत्सुकः
राजेन्द्रश्च जनाधिपः स्फटिकसच्छायाशयःसत्तमः ।
युद्धाद्भीतिमपोहयन्स जगतामण्वादिशस्त्रोच्छ्रिता-
न्नेरुश्च स्फुरतस्तरां प्रतिनिधी गान्धेः प्रजा रक्षितुम् ॥ १० ॥

अव्यादव्याजसौजन्यपर्जन्यौ जानकीसखः ।
श्रीमद्भारतमातुर्नःपुत्रान्धर्माश्चिशाश्वतान् ॥ ११ ॥

वन्दे मातरम्

ॐ तत्सत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महासती श्रुतावती

भगवतो भरद्वाजस्य मुनेः श्रुतावती नामकन्या आसीत् । सा अतीव रूपवती गुणवती इति विख्याता अभवत् । सा प्रतिदिनं पाठ प्रवचनकाले पितु भरद्वाजस्य समीप एव दत्तचित्ता निषीदति स्म । एवं श्रवणमात्रेणैव सा सर्वविद्यापारंगता अभूत् । श्रुतावती नाम भुवम् अवतीर्णा साक्षात् सरस्वती एव इति लोके सर्वत्रापि प्रसिद्धिः अवर्तत । महामहापण्डिताः अपि शास्त्रग्रन्थेषु कठिणविषयान् श्रुतावतीं विचारयन्तिस्म । ज्ञानवृद्धेभ्यः दुर्बोधान् अपि दार्शनिकविषयान् श्रुतावती अनायासं विनालोचनं च सम्यक् निरूपयति स्म । एवं महापण्डिता प्रतिभावती इति सा मुनिभिः मनुजैः राजमहाराजैरपि आदृता अभिनन्दिता च बभूव।शुकस्य मंजुभाषणमेव तस्य पंजरबन्धनाय कारणीभवति। एवं क्वचित् गुणा अपि दोषात्मना भुवि परिणमन्ति । श्रुतावत्या अतीव पाण्डित्यं तस्या बाधकमेव संपन्नम् । प्राप्तवयस्कायां तस्यांपिता योग्याय वराय दातुं ऐच्छत् ।

परं निसर्गतः असूयायुक्ता पुरुषजातिः । "स्त्रियः, तत्रापि स्वपाणिंजिघृक्षन्त्याः कन्यायाः ज्ञानं स्वस्मादपि यदि अधिकं भवेत् तदा आत्मन महदवमानं भवेत्" । इति विचारेण सर्वेऽपि वराः "विद्या वपुर्वित्तादि सर्वंदृष्टया अवरा एवकन्या वरम्" इति तादृशीं एव वरयन्ति । अत एव चतुराः कन्यापितरः स्वपुत्रीणां परिमितमेव शिक्षणं दापयन्ति ।

श्रुतावती तु विद्यावती अपरैव सरस्वती इति विश्वविश्रुता एव आसीत् । ज्ञानिनी मानिनी प्रायो विनयशालिनी पतिमानिनी च नैव भवति इति तर्कयित्वा न कोऽपि ऋषिकुमारः राजकुमारो वा तस्याः पाणिं गृहीतुं अधृष्णोत् । सापि ज्ञानशून्यं पुरुषं परिणेतुं नैच्छत् । एवं तस्याः विवाहचिन्तया एव तत्पिता मरणं गतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रैकदा तदाश्रमं प्रति भगवान् नारदः आजगाम । तन्मुखात् सा देवेन्द्रस्य शौर्यं सौंदर्यं संपदं गुणसंपदं च शुश्राव । तदा तस्याः मनसि सुरनाथस्य विषये अनुरागः अंकुरितः । तमेव च पतिं कर्तुं सा इयेष । पर कुत्र इयं मानवी क्वासौ देवराजः? सर्वथा दुर्घट एव तयोः सम्बन्धः। सर्वमेतत् सुसूक्ष्मं श्रुतावती न विचारयामास इति न । विचारांते सा एवं निरणैषीत् "विना तपः तथाविधाः महापुरुषाः देवतापुरुषा वा नाधिगन्तुं शक्यन्ते । अतएव पार्वती 'तपोभिरास्थाय समाधिमात्मनः' परशिवं प्राप । तथैव अहमपि इतरसाधनदुष्प्रापमपि सुरराजं तपोभिः प्राप्स्यामि" इति ।

एवं निर्धार्य सा उग्रं तपः तप्तुं प्रारेभे । तपोवृद्धा अपि तस्याः कुसुमकोमलांग्याः घोरतरां तपश्चर्यां दृष्ट्वा आश्चर्यचकिताः आदरवन्तश्च समभवन् । निराहारा निराधारा निरभिमाना च भूत्वा सा एवमेव चिरं तपश्चचार । तस्याः अत्युग्रतरेण तपोमहिम्ना अन्ते देवदेवः परितुष्टो बभूव । सरस्वतीतटाके परिशोभमानं प्रशान्तम् आश्रमपदम् आगच्छत् । तत्र च तस्याः स्वभावं परीक्षितुं इन्द्रः वशिष्ठऋषेः रूपं धृत्वा अंतः प्रविवेश ।

ब्रह्मर्षिप्रवरं वशिष्ठं स्वयमागतं दृष्ट्वा अतीव संतुष्टा सा सुस्वागतेन अभिनन्द्य साष्टांगं अभिवंद्य ससंभ्रमं संपूज्य च स्वमनोरथं निवेदयामास । तदा वशिष्ठोऽपि श्रुतावत्याः इन्द्रानुरागं अभिनंद्य अतिथिपूजादिरूपधर्मकर्मानुष्ठानपरा भवेत्यादिदेश । सापि च सश्रद्धं तथेति ऋषेः उपदेशं सादर प्रतिजग्राह ।

ततो वशिष्ठः स्वफलाहाराय पचेति पंच बदरीफलानि प्रादात् । स्वयं च स्नानाह्निकादिकं कर्तुं नातिदूरवर्ति इन्द्रतीर्थं जगाम ।

श्रुतावती तु स्नात्वा शुचिर्भूत्वा चुल्लीं प्रज्वाल्य बदराणि पाचयितुम् उपाक्रमत । चिरंप्रज्वाल्य पाचितान्यपि तानि नापच्यन्त । गृहसंगृहीतः सर्वोऽपि काष्ठराशिः ज्वलितः भस्मीभूतश्च । परं बदरीपञ्चकं तु नेषदपि परिपक्वम् । ततः सा आश्रमपरिसरवर्ति शुष्केन्धनं सर्वमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आहृत्य पुनः प्रज्वालयामास ज्वलनं पुनश्च पाचयामास बदरीफलानि। महानसे भस्मभरितेऽपि तत्फलपाचनं नेषदपि समवर्तत। सूर्यास्तसमयः समासन्नः। माध्याह्निकानुष्ठानं समाप्य वशिष्ठमुनिः इंद्रतीर्थादागत्य "श्रुतावति! क्षुधापीडितोऽस्मि। लघु परिवेषय" इत्यादिदेश। परं इन्धनं सर्वमपि ज्वलितप्रायमेव अवर्तत। चुल्यां पाचकाग्निरपि निर्वाणोन्मुख एवालक्ष्यत।

तदा संभ्रान्ता अतिथिपूजनैकव्यग्रा श्रुतावती तावदपि फलान्यपक्वान्येवेति दृष्ट्वा, इतरत्काष्ठादिकं अपश्यन्ती निर्वाणभूयिष्ठं चुल्यग्निं सन्धुक्षयितुं स्वपादौ एव चुल्यां प्रावेशयत्। ज्वलज्ज्वलनेन दन्दह्यमानयोरपि स्वपादयोः विलक्षणवेदनाविह्वलापि सा 'अतिथिर्विमनायेदिति' न चीदकरोत् नापि उच्चैरुरोद। प्रत्युत ससमाधानं दह्यमानौ स्वपादौ अग्निकुण्डे संपूर्णप्लोषणाय इतस्ततः परावर्तयन्ती आसीत्। तदा मानवदेहदाहवासनाम् आघ्राय वशिष्ठरूपधारी विबुधवरिष्ठःमहानसान्तः प्रविवेश। तदा तत्रत्यं दारुणतरं दृश्यं विलोक्य चमत्कृतः स्तम्भीभूतः आश्चर्यचकितः दिङ्मूढः दयावगाढश्च भूत्वा अवाक् अतिष्ठत्। अहो अतिथिसन्तर्पणव्यसनिता भारतीय ललनानाम्! अहो दुःखसहिष्णुता सुकुमारांगीणाम्

"पादौ प्रक्षिप्य सा पूर्वं पावके चारुदर्शना
दग्धौ दग्धौ पुनःपादौ उपावर्तयतानघ! ॥
चरणौ दह्यमानौ तु नाचिन्तयदनिन्दिता
न वैमनस्यं तस्यास्तु मुखभेदोऽथवाऽभवत्
तस्यास्तु चरणौ वह्निःददाह भगवान् स्वयं
न च तस्या मनोदुःखं स्वल्पमप्यभवत्तदा ॥

तस्या ईदृशीं भक्तिं तपः अतिथिसत्कारं मनोदार्ढ्यं स्वानुरागं च दृष्ट्वा अतितरां सुप्रीतःसुप्रसन्नश्च सुरलोकसार्वभौमःनिजरूपं प्रकटीचकार। तस्याः पादौ पूर्ववद्विधाय तस्याः पाणिं जग्राह अनुजग्राह च। तच्चस्थानमद्यापि बदरपाचनतीर्थमिति प्रसिद्धं वरीवर्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविवरः श्रीधनञ्जयः।

ले. स्वर्गीय श्री अप्पाशास्त्रि राशिवडेकर महोदयाः
संस्कृतचन्द्रिका संपादकाः

इह खलु संसारे मानुषं जन्मैव नितरां दुर्लभं तत्र च द्विजत्वं तत्रापि विद्वत्वं तत्र च कवित्वम्। ये तु प्रायेण कवयितारो न ते शास्त्राब्धिपारदृश्वानः। ये च शास्त्रे पटीयाँसो न ते सरसरमणीयानि पद्यानि निर्माय कवीभवितुं प्रभवन्ति। ये तु तत्रोभयत्रापि निष्णातास्त एव धन्यास्तेष्वेव चायं कविर्धनञ्जयो नाम। कविरप्यसौ महात्मा नाट्यशास्त्रे निकामं प्रवीण आसीत्। विदितमेव सर्वेषां सहृदयानां नाट्यशास्त्रस्य मनोहारित्वं दुरवगमत्वं च। तत्र च सुखप्रवेशाय कविरयं प्रबन्धं प्रणिनायेति सुस्पष्टमेतस्य तत्र प्राबीण्यं सहृदयत्वं च। अयं किल प्राचीनकवीनां नियमो यदात्मना प्रणीतस्य प्रबन्धस्यात्मनो वा समुत्पत्त्यवसरं नोल्लिखन्ति। दृश्यन्ते ह्येवंविधा एव बहवो भवभूत्यादयः कवयः। तदेतदपि नाश्चर्यं यदसौ कविरात्मनः कालं कुत्रापि नोल्लिलेखेति। पूर्वं किल ये ये विद्वांसः पण्डिताः कवयो वा बभूवुस्तान्सर्वानपि पूर्वे महीपालाः प्रोत्साहयामासुश्चक्रुश्चात्मनः सभ्यान्। तथा चैषामुपचक्रुर्यथैते जगद्विसृत्वरेणात्मनो यशसा सहात्मनः प्रोत्साहयितुर्भूपालस्यापि यशः प्रख्यापयितुं तस्य नाम स्वप्रणीतेषु प्रबन्धेषु निबबन्धुः। अनया च कृतज्ञतयाऽविस्पष्टोऽप्येषामवस्थितिसमयः सामान्यतो विशेषतो वा यथायथमवगन्तुं शक्यते। अत एव श्रीधनञ्जयकविना यद्यपि नोल्लिखित आत्मनोऽवस्थित्यवसरस्तथापि सोऽवगम्यते। तथाहि। कविरयं स्वप्रणीतस्य दशरूपकनाम्नः प्रबन्धस्यावसाने पद्यमिदं निबबन्ध। यथा।-

विष्णोः सुतेनापि धनञ्जयेन।
विद्वन्मनोरागनिबन्धहेतुः।
आविष्कृतं मुञ्जमहीशगोष्ठी-
वैदग्ध्यभाजा दशरूपमेतत्॥ इति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेन चायं मुञ्जनाम्नो भूपालस्य सभायां विदग्धः कविरासीदिति प्रतीयते। मुञ्जश्च कदानीं समुत्पन्न इत्यत्रास्ति मनाग्विवादः। भोजप्रबन्धकारोहि बल्लालो मुञ्जो नाम भोजदेवस्य पितृव्य इत्याह जगाद च तस्य धारानगर एवावस्थानम्।(*)। भोजश्च विक्रमशकस्य त्रयोदशशतके शालिवाहनशकस्य द्वादशशतके वा भूमिं पालयामासेति ज्ञायते (?)। ततश्च मुञ्जोऽपि तस्यैवासन्ने प्राक्तने काले समुत्पन्न इत्यवगम्यते। परे तु भोजस्य पितामहं वाक्पतिराजमेव मुञ्जापरनामानं प्राहुः। तन्मते च मुञ्जोऽयं न धारानगराधिपतिरासीत्किं तु महाकालसमुल्लसितोज्जयिनीनगर्यैवास्य राजधानीति। वाक्पतिराजश्च विक्रमस्यैकादशशतके शालिवाहनशकस्य दशमशतके वौज्जयिनीं पालयामासेति तद्दत्तैर्दानपत्रैर्ज्ञायते(२)। एवं च प्रथममतेन मुञ्जस्यावस्थितिः शालिवाहनशकस्य द्वादशशताब्द्यां पर्यवस्यति। द्वितीयेन च शालिवाहनशकस्य दशमशतके सा निश्चीयते। अनयोस्तु मतयोर्निपुणमवधारितयोः प्रथमं निष्प्रमागमिव प्रतिभाति द्वितीयं च प्रमाणान्तरेण सुदृढतामापद्यते। तथा ह्यमितगतिनामा जिनपरिव्राजकः स्वप्रणीते सुभाषितरत्नसन्दोहे प्राह।

समारूढे पूतत्रिदिववसतिं विक्रमनृपे
सहस्रे वर्षाणां प्रभवति हि पञ्चाशदधिके (१०५०)।
समाप्तं पञ्चम्यामवति धरणिं मुञ्जनृपतौ
सिते पक्षे पौषे बुधहितमिदं शास्त्रमनघम्॥इति॥(प्रा.ले.मा)

एवं च विक्रमशकस्यैकादशशताब्द्यां शालिवाहनशकस्य दशमशताब्द्यां वा श्रीमुञ्जराजो धरां पालयामासेति पर्यवसितम्। अत एव युज्यते वाक्पतिराजस्यैवापरं नाम मुञ्ज इति वक्तुम्। भोजप्रबन्धानुसारेण तु यदि मुञ्जो भोजदेवस्य पितृव्य इति समभ्युपेयते तदा तदनुसारेणैव तयोरेककालिकत्वमर्थादेव पर्यवसितं तच्च प्रमाणमन्तरा प्रतिपादयितुमशक्यमतः सुष्ठूक्तं वाक्पतिराजो नाम भोजदेवपितामह एव मुञ्जापरनामेति। एवं च शालिवाहनशकस्य दशमे शतके मुञ्जनृपो धरां पालयामास रावैव न मुञ्जपरनामा भूमिपतिर्भूतेति स्फुटीभूतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतच्च प्रमाणान्तरेणापि साधयितुं शक्यम् । तथा हि । कविरयं दशरूपकस्य प्रथमपरिच्छेदावसाने वस्तुनिर्माणप्रस्तावे प्राह ।–

इत्याद्यशेषमिह वस्तुविभेदजातं
रामायणादि च विभाव्य बृहत्कथां च ।
आसूत्रयेत्तदनु नेतृरसानुगुण्या-
च्चित्रां कथामुचितचारुवचःप्रपञ्चैः ।। इति ।।

अत्र च पद्ये कृतो बृहत्कथानामोल्लेख एतत्कविसमये क्षेमेन्द्रप्रणीताया बृहत्कथामञ्जर्याः सोमभट्टप्रणीतस्य च कथासरित्सागरस्याविद्यमानत्वं द्योतयति । एतच्च तत्रैवोदाहृतेन–

चाणक्यनाम्ना तेनाथ शकटालगृहे रहः ।
कृत्यां विधाय सहसा सपुत्रो निहतो नृपः ।।
योगानन्दयशः शेषे पूर्वनन्दसुतस्ततः ।
चन्द्रगुप्तः कृती राजा चाणक्येन महौजसा ।।

इति पद्यद्वयेन सविशेषं दृढीभवति । एवं चतुर्थपरिच्छेदे स्थायिभावोदाहरणप्रसङ्गादुक्तं यथा बृहत्कथायां नरवाहनदत्तस्य मदनमंजूषायामनुराग इति वाक्यमप्येतत्कविकाले कथासरित्सागरस्य बृहत्कथामंजर्याश्चाभावं गमयति । अतो बृहत्कथामंजरीकर्तुः क्षेमेन्द्रात्कथासरित्सागरकर्तुः सोमदेवाच्च प्राचीनोऽयं धनंजयकविरिति पर्यवसितम् । तौ च ख्रिस्तीयैकादशशताब्द्यां प्रादुरभूतामित्यन्यतो ज्ञायते ततः प्राचीनत्वाच्च धनंजयस्य शालिवाहनशकस्य दशमशताब्द्यां प्रादुर्भावः सूपपन्न इति ।

कविरयं ब्राह्मणस्तातोऽस्य विष्णुशर्मा पण्डितः । मुंजमहीशस्य सभ्योयमत एवास्योज्जयिन्यां नाम मुंजराजधान्यां निवास इति सुस्पष्टमेव । सा च नगरी स्वनाम्नैवेदानीं प्रसिद्धा ।

कविनाऽनेन दशरूपकं नाम दृश्यकाव्यानामनुशासनं प्रणीतम् । तस्य चत्वारः परिच्छेदास्तत्र प्रथमे वस्तुतद्भेदसन्ध्यादीनां प्रपंचो द्वितीये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नायिकानां नायकानां च भेदास्तल्लक्षणानि च सलक्षणाश्च नायिकानां स्वाभाविकालंकाराः कैशिक्यादिवृत्तिचतुष्टयं तदङ्गलक्षणादिविचारो भाषाविभागः संबोधननियमाश्च प्रतिपादितास्तृतीये नाटकलक्षणादिविस्तारश्चतुर्थे च रसनिरूपणमिति । एतच्च दशरूपकं भारतीयनाट्यशास्त्रस्याष्टादशोनविंशविंशचतुस्त्रिंशानध्यायानुपजीवति ।

धनंजयस्य च कवित्वे दशरूपके तत्र तत्रोपलभ्यमानो वाग्विलास एव प्रमाणम् । सत्र संक्षेपाद्यथाप्रागलभ्योदाहरणम् (पृ० ९३)

तथा व्रीडाविधेयाऽपि तथा मुग्धाऽपि सुन्दरी ।
कलाप्रयोगचातुर्ये स्वभावाचार्यकं गता ॥

ललितोदाहरणम् (पृ० ९८)

सभ्रूभङ्गं करकिसलयावर्तनैरुल्लपन्ती
सा पश्यन्ती ललितललितं लोचनैरञ्चलेन ।
विन्यस्यन्ती चरणकमले लीलया स्वैरयातै-
र्निःसङ्गीतं प्रथमवयसा नर्तिता पङ्कजाक्षी ॥

विभ्रमोदाहरणम् (पृ० ९६)

श्रुत्वा यातं बहिः कान्तमसमाप्तविभूषया ।
भालेंजनं दृशोर्लक्षा कपोले तिलकः कृतः ॥

ईर्ष्योदाहरणम् (पृ० १८५)

सुभ्रु त्वं नवनीतकल्पहृदया केनापि दुर्मन्त्रिणा
मिथ्यैव प्रियकारिणा मधुमुखेनास्मासु चण्डीकृता ।
किंत्वेतद्विमृश क्षणं प्रणयिनामेणाक्षि कस्ते हितः
किं धात्रीतनया वयं किमु सखी किं वा किमस्मत्सुहृत् ॥

सामोदाहरणम् (पृ० १८६)

स्मितज्योत्स्नाभिस्ते धवलयति विश्वं मुखशशी
दृशस्ते पीयुषद्रवमिव विमुञ्चन्ति परितः ।
वपुस्ते लावण्यं किरति मधुरं दिक्षु तदिदं
कुतस्ते पारुष्यं सुतनु हृदयेत्याह गणितम्

111033

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र च प्रद्योतमाना माधुर्यप्रसादकान्त्यादयो गुणा विलसन्ती च वैदर्भी रीतीरसानुगणा चाक्लिष्टा शय्या कवयितुरुत्तमकवित्वं विशदयन्ति। यद्यप्यनेन शृङ्गारे स्वीयपद्यान्युदाहरणत्वेनोपन्यस्तानि तथापि रसान्तरप्रावीण्यमप्यस्य कवित्वमेवानुमापयति। एतस्य कवेः कृतिषु दशरूपकमेव प्रथितं मुद्रितं सुलभं च। किं तु दशरूपके १७१ पृष्ठे तद्यथाऽवोचाम काव्यनिर्णय इत्युक्त्वा तात्पर्यातिरेकाच्चेत्यादिसप्तश्लोक्युपन्यस्ता। सा च दशरूपके काव्यनिर्णयप्रकरणाभावादेतत्कविकृतं काव्यनिर्णयाख्यं प्रबन्धान्तरं सूचयति। स च प्रबन्धो नाद्याप्यस्माकं नयनपदवीमवतीर्णः। अहो नु खलु भोः दुर्भाग्यं संस्कृतभाषाया यदियं प्राचीनैर्नानाविधैः प्रबन्धैः प्रसाध्योपलालिताऽपि करालकालविपाकेनाक्रान्ता सविशेषं कार्श्यमावहति। कवेरस्य प्रबन्धान्तरं नाद्याप्याकर्णितमस्माभिः।

यस्य राज्ञः सभायामयं कविरासीत्सोऽपि महाराजो मुञ्जः कविरेव बभूवेति प्रतीयते। तत्कृतः प्रबन्धो यद्यपि नाद्यापि दृष्टोऽस्माभिस्तथापि दशरूपके धनञ्जयेनोदाहृतमस्यैव पद्यमेकं प्रत्यक्षीकृतं यथा—

प्राणयकुपितां दृष्ट्वा देवीं ससंभ्रमविस्मित-
स्त्रीभुवनगुरुर्भीत्या सद्यः प्रणामपरोऽभवत्।
नमितशिरसो गङ्गालोके तया चरणाहता-
ववतु भवतस्त्र्यक्षस्यैतद्विलक्षमवस्थितम्॥ इति॥

अनेन पद्येन कस्यापि रूपकस्य नान्द्या भवितव्यमिति प्रतिभाति। नान्द्यामेव हि पुरोवर्तिनः सामाजिकानुद्दिश्य भवद्युष्मदादिपदानि प्रयुज्यन्ते।

तदेवं यथामति निर्णीयोपहृतः कविवरस्य श्रीधनंजयस्य प्रादुर्भावसमयः सहृदयेभ्योऽस्माभिरिति शिवम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd No. B. 7171

मधुरवाणी नियमावली

ये पंचनवीनग्राहकान् सम्पादयन्ति तेभ्यः विना मूल्यं मधुरवाणी पत्रिका प्रेष्यते ।

वर्षे यदा कदाचिदपि वा ग्राहकत्वं स्वीकर्तुं शक्यते । यदा ग्राहकता स्वीक्रियते तद्दिनादारभ्यैव वर्षपर्यन्तं द्वादशसञ्चिकाः प्रदीयन्ते ।

11033

विना मूल्यं आदर्शसञ्चिका न प्रहीयते । अवलोकनार्थं सञ्चिका अपेक्षमाणैः अष्टाणक पोस्ट-टिकीट प्रेषणं कार्यम् ।

व्हि. पी. द्वारा पत्रिका नैव प्रेष्यते । प्रतिवर्षं वर्षारंभे मनिऑर्डर द्वारा एव शुल्कं प्रेषणीयम् ।

ग्राहकेतरेषामपि लेखाः सरसाश्चेत् प्रकाश्येरन् । असुवाच्याक्षराः नीरसाः दीर्घतराकाराः कठिणतमाश्च लेखा नैव अवसरमासादयेयुः । सरलतमानां लेखानां प्रथमप्राशस्त्यं प्रदीयते ।

BOOK - POST

To,

Sgp. The Registrar Gurukula University.
Post: Gurukul Kangri.
Distt: Saharanpur.

If addressee is not found please return to sender.

Pandharinathacharya Galagali

Aditor Madhurwani

Madhurwani Office Gadag (Karnatak)

Printed at the New Gadag Printery Godag. by P. S. Hom and Pablished by Pandharinathacharya Golagali at Gadag.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Madhurwani Office Gadag (Karnatak)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar